Chapter-3

# काव्यशास्त्रेषु नायक–नायिका भेद विमर्श:

# तृतीयोऽध्याय:

# रसनिष्पतिः

साहित्य दर्पणकारेण तृतीय परिच्छेदे रसस्वरुप निरुपणे एवम् प्रोक्तम्

विभावेनानुभावेन व्यक्त : सञ्चारिणा तथा।
रसतामेति रत्यादिः स्थायीभावः सचेतसाम्॥[1]

तन्मते विभावानुभाव तथा संचारी भावेन रसः व्यक्तो भवति। रत्यादि स्थायीभावाः अनेन रसः व्यक्तो भवति। रत्यादि स्थायीभावाः अनेन रसताम् प्राप्नोतिमिरति स्थायीभावाः विभावानुभाव संचारीभाव योगेन स्थायीभावाः एव रसरुपेण परिणमत। साहित्यदर्पणकार विश्वनाथोअयम् रस- सिद्धान्तस्य आचार्यः तेन काव्यस्य लक्षणमापि वाक्यम् रसात्मकं काव्यमिरति प्रोक्तम्।

अत्र विभावादिपदेन काव्यन्तवरतनायकनायिकादि आलम्बनविभावज्ञानेन, तथा चन्द्रचन्द्रनादिरुपोदीपनविभावज्ञानेन चेत्यर्थः। अनुभावेन अनुरागादिप्रकाश कस्तम्भस्वेदादि रुपानुभावज्ञानेनेत्यद यथा स्वयं सचेतसां सामाजिकानां सहृदयानां इत्यादिरनुरागप्रभृतिः स्थायीभावः स्थायिभावज्ञानं रसतां, रसस्वररुपत्वमेति प्रतिपाद्यते। नायकादिनिष्ठोऽपि इत्यामिर्ज्ञानसम्बन्धेन सामाजिकनिष्ठो रसो भवन्ति। सामाजिकेषु विभावादिज्ञानमेव युगपद्रसरुपेण प्रकाशते इति भावः। वासनारुपतयातिसूक्ष्मरुपेणवस्थितान् स्थायिनः विभावयन्ति आस्वादयोग्यतामः नयन्ति विभावाः। इत्यादिन् स्थायिन अनुभावयन्ति अनुभवविषयी कुर्वन्ती अनुभावाः। सम्यक् इत्यामिन् काये चारयन्ति सञ्चारयन्ति मुहुर्मुहुरभिव्यञ्जयन्ति वा सञ्चारिण इति। अस्मिन पक्षे नास्ति लक्षणायाः प्रयोजनम्। काव्ये कारणानि विभावाः इति कार्व्याणि अनुभावा इति सहकारिणः सञ्चारिण इति व्यपदेशं लभन्ते। वाभावादीनां पार्थक्येन प्रतीति प्रसङ्गान् धटपटविति समूहालम्बनवदिति चेन्न पानकर सन्यायेन रसोअयमी निष्पन्नो भवति।

रसोअयम् दध्यादिन्यायेन रुपान्तरपरिणतो व्यक्तिकृत एव रसो नतु दीपेन धट इव पूर्वसिध्धो व्यज्यते। दध्यादिन्यायेन दुध्धमयथा आम्बलयोगात दधिरुपेण परिणमते। दधित्वेन व्यन्कते। सहृदधकृते। विभावादिज्ञानम् काव्य नाट्यगत् वचन चातुर्यवसात् रुपान्तरेण

1 साहित्यदर्पणम् 3:1।

विलक्षण सुखमयज्ञानाचेन परिणता: संन्नात्मन एव आत्मारसत्वेन व्यक्तिगत एव रसो व्यपमिश्यते इति भावा:। अयम् रसा: नता दिपेन धट्इव पूर्व सिध्धो व्यज्यते। रसा: प्रतियन्त इति ओदनम् प्रष्टिदिवम् व्यवहारा। ब्रह्मानन्द स्वरुपो अयम् रसा:। सुख – दु:खात्माकम् प्रसंग अपि। सीता हरणम् वनवासगमनम् सुख – दु:खात्माकम् प्रसंगम् अपि काव्ये नाट्ये च सुखमेव जनयन्ति।

सवासनानां स्भ्यानांन रसस्यादना भवेत ।
निर्वासनास्तु रङ्गान्त:काष्ट कुड्याश्मसन्निभा: ॥

प्रती यन्ते नट शिक्षा अभ्यासादिमत्रेण राघवादे: स्वरुपम् दर्शयति। अयम् रसा: न नित्य: न अनित्या:। परमान्द स्वरुपो अयम् नसविकल्पक वेद्य: ननिर्विकल्पका: नअप्रास तथा प्रकाशते न परोक्षा न अपरोक्षा अलौकिको अयम् रसा:।

# विभाव निरुपणम्

रसान् भावयन्ति उत्पादयन्ति विशेषण तेएव विभावाः[1]। रसरत्नप्रदीपिकायाम् अल्लराजेनापि एवम् एव स्थापना। कृता वर्तते[2]। तन्मते विशेषण भावयन्ति उत्पादयन्ति रसान ते विभावाः कथ्यन्ते। आचार्य भरतमुनि मते विभावाः एव कारणम् निमितम् हैतोः पर्यायिश्च[3]। आयार्य अभिनवगुप्तेन स्वकीयं मतम् एवम् प्रदतम्। लोके रत्यादि उदबोधकस्य कारणम् प्रमोदाः भवन्ति। काव्ये—नाटये च विभावादयाः अलौकिक व्यापाराः शब्दद्वारेणैव। उदबोध्यन्ते व्यापार कारणदएव प्रमदादयाः विभावाः कथ्यन्ते[4]। मम्मट तथा विश्वनाथेन अभिनवयुगप्त पादाचार्यस्च एव विभाव विषये अनुसरणम् कृतम्। तेषां मते इत्यादिषुलोके यत् कारणानि भवन्ति ते इव काव्ये नाट्ये च निर्विषेसनत्वेन विभावाः कथयन्ते[5]। अल्लराजेन रसान् उत्पादयन्ति ते एव विभावाः। भानुदत मिश्रेण रसोत्पादधनाय यानि कारणानि भवन्ति ते एव विभावाः रसस्वरुपम् रसस्वरुप विवेचने तेन विभाव अनुभाव सात्विक तथा व्यभिचारिभावान् स्थायिभावानाम् प्रबोधकम् इति उक्तम्।

# आलम्बन विभावः

विभावस्य प्रकारद्वयम् भवति। आलम्बन विभावः उद्दीपन विभावश्च[6]। धनञ्जय भोज विश्वनाथ, अल्लराज, विद्यानाथ आदि पूर्वाचार्योः विभावस्य भेदद्वव्यम् प्रदर्शितम्[7]। आलम्बनविभावः उद्दीपन विभावश्च[8]। उदाहरणम् यथा कामिनीआदि नामपि। एतेदन मतम् भानुदत्तमिश्रेण शृंगारादि रस तथा विभावादि पृथक - पृथक प्रदशितम्। धनञ्जयेन रस तथा स्थायिभावयो अभेदः प्रदर्शितः।

---

1. विशेषेण भावयन्तयुत्पादयन्ति ये रसास्ते विभावाः। रसतरङ्गिणी 2/पृ. 13।
2 विशेषेण भावयन्ति उत्पादयन्ति ये रसान् ते विभावाः कथ्यन्ते। रसरत्नप्रदीपिका 3/पृ 7।
3. विभावः कारण निमित्त हेतुरिति पर्यायाः नाट्यशास्त्र 7/पृ 346।
4. लोके प्रमदादिभिः ............काव्ये नाटये च तैरेव कारणत्वदिपरिहारेण विभावनादिव्यापार वत्वादलौकिक विभावादिशब्दव्यवहार्य्यैः। काव्यप्रकाश 4/पृ 114।
5 काव्यप्रकाश, 4/27 28। साहित्यदर्पण 3/14।
6 तेच द्विविधाः। आलम्बनविभावा उद्दीपन विभावश्चेति। वहि 2/पृ. 13।
7 दशरुपक 4/2 । सरस्वतीकण्ठाभरण पृ/3 पृ - 38। साहित्यदर्पण 3/29। रसरत्नप्रदीपिका 3/पृ 7। प्रतापरुद्रीय रसप्रकरण पृ 158।
8. यमालम्ब्य रस उत्पदते स आलम्बनविभावः यो रसमुद्दीपयति स उदीपनविभावाः॥ रसतर 2/पृ 13।

# उद्दीपन विभाव:

नायिकादया: श्रृंगाररसस्य आळम्बन विभावा: सन्ति। महाकविना अल्लराजेन कामिनी श्रृंगाररसस्य आलम्बन विभावत्व स्वकीयम् निरुपणम् उपन्यस्तम्[1]। आचार्य विश्वनाथ मते परकीया तथाअनुरागशून्यम् नायिकाम् बिहाय अन्या नायिका: तथा दक्षिणादि शठ नायिका: शृंगाररसस्य आलम्बन विभावत्वेन सुङयन्ते। नाट्याशास्त्रानुसारेण ऋतु माला अलंकार प्रियजन उपवन गमनम् बिहारादि शृंगार रसाद्एव समुद्र-भवन्ति[2]। भानुदत्त मिश्रेण शृंगार रसाद्एव उदीपनकारणम् चन्द - चंदनादि परिणीतम् एवम् हास्य रसस्य विभावानाम् विकृत अलंकार विकृताकार वेशभूषा हास्यरसम् उद्दीपयन्ति[3]। करुणरसस्य विभावत्वेन रुष्टजनानाम् नाशम्। शाप, क्लेश, बन्धन,व्यसन(विपत्ति)[4]आदि करुणरसम् उद्दीपयन्ति। रौद्ररसस्य विभावत्वेन युध्धम् प्रहारा: ताडनम् आदि भवति[5]। वीर रसस्य उद्दीपन विभावा: उत्साह - अध्यवसाय[6] अविषाद विस्मयहीनता मोहशून्यता। आदि वीर रसम् उधपादयन्ति[7]। भानुदत्तेन उत्साहादि विभावादि विभावानां वीररसस्य उद्दीपन कारणत्वेन अस्ति। भयानक रसस्य विभावत्वेन विकृतिशब्द, भूत प्रेतनाम दर्शनम्। युद्ध-भूमि तथा शून्यम् गृहम् भयदायकम् वर्णनम् एव भयानक रसस्य उदीपन कारणानि भवन्ति। अल्लराजेन शून्यम् गृहम् अरण्यम् स्मशान दर्शनम् स्वजनस्य कारागार गमनम् भयानक रसम् समुत्पादनम् कारणनि भवन्ति[8]। माया, इन्द्रजाल अर्थलाभ् आदि अद्भूत-रसस्य विभावत्वेन प्रयोज्यन्ते[9]।

# अनुभाव निरुपणम्

भानुदत्तमिश्रमते रसान अनुभावयन्ति ते अनुभावा:[10]। कटाक्षादि परिज्ञानेन तस्य फलम्

1. तत्र आलम्बनविभाव: कामिनी। रसरत्नप्रदीपिका 3/पृ.7 ।
2. अनुवाद, नाट्यशास्त्र (रधुवंश) 6/पृ. 353।
3. विपरीतालङ्कारैर्विकृताचाराडभिधानवेषैश्च।
   विकृतैरर्धविशेषर्हसनीति रस: स्मृतौ हास्य:॥ रसतर 2/4।
4 भाषा-टीका 2/पृ. 35।
5 अभिनवभारती 6/पृ. 569।
6. संस्कृत-शब्दार्थ- कौस्तुभ-पृ.46।
7. उत्साहाध्यादविषारित्वादविस्मयान्मो हात। विविधादर्थविशेषादृीरसो नाम सम्भवति। रसतर. 2/10।
   - नाट्यशास्त्र, 6/64।
8. विकृतरवश्रवण विकृतसत्त्वदर्शन स्वजनबन्धनश्रवणदर्शनं इत्यादयो विभावा भवन्ति।
   रसरत्नप्रदीपिका, 3/पृ 8।
9. मायेन्द्रजालार्थलाभादय ऊहनीया:। रसतर ,2/18।
10 ये रसननुभावयन्ति अनुभवगोचरत: नयन्ति ते अनुभावा:। रसतर., 3/पृ 25।

अनुभावश्च भवति। भानुदत्त मिश्रेण रसनिमित्तम् अनुभावदया: आवश्यनम् भवन्ति। अल्लराजमते अनुभवस्यविषया: एवअनुभावा:[1]। घनञ्जय तथा शारदातनय महोदयेन अनुभावो विकारस्तु भावसं सुचनात्मक विद्यानाथेन रसस्यकार्यम् एव अवुभावा: इति प्रोक्तम्[2]। भरतआदिनती आचार्यै: अनुभावानाम् विवेचनम् लौकिक दृष्ट्या कृतम् तन्मते नायकादीनाम् सूचनम् दीयमानेन कटाक्षादि: एव अनुभावत्वेन प्रयुज्यते। भानुदत्त मिश्रेण अनुभावस्य् भेदचतुष्टयम् प्रदत्तम्। कायिक मानसिक, आहार्य तथा सात्विक[3]। भुजकक्षेपादि कायिकं अनुभावत्वेन तथा प्रमोदादि मानसिक अनुभावत्वेन[4]। आहार्य, रोमांचादि, सात्विक अनुभावत्वेन कथ्यन्ते। नाटये चर्तुभुजत्व ज्ञानम् आहार्या तथा रोमोंचादि सात्त्विक अनुभावत्वेन बोध्यन्ते[5]। शारदातनय तथा भोजराजेन मनवाणी शरीर तथा बुध्दिद्वारा अनुभावस्य चत्वारो भेदा: स्वीकृता:[6]। मन - आरम्भानुभाव,वागारम्भानुभावा, शरीर रम्भानुभाव गत्रारम्भानुभाव तथा। बुध्दयारम्भानुभावश्च। शारदातनय मते भाव, हाव, हेलादि, दशअलंकारा: मनआरंभानुभावा: आलापादि द्वादश वागारम्भानुभावा लीलादि स्त्रीणां दश स्वाभाविक अलंकारा: गात्रारम्भानुभावश्य अंतरगतन्वेन संभवन्ति। रतिवृति, प्रवृति आदि बुध्द्वयारम्भावा:[7]। भानुदत्तमित्र महोदयानाम अनुभावश्च चतुर्भेदा मानस आहार्य तथा सात्विक भेदेत्वेन प्रशंसनीय:। भानुदत्त मिश्रेण रसम् अन्त: करणस्य धर्मविषयम् भूत्वा बाह्यरुपात् प्रतीति कार्यन्तान अनुभावान् प्रोक्तम्[8]। भानुदत्तमिश्रेण चतुर्भूजत्व इत्यस्य ज्ञानेन आहार्यादि अनुभावा: प्रोक्ता:[9]। भानुदत्त मिश्रेण नाट्ये अभिनवे। स्वकीयम् सह अन्यन भुजद्वययम् यदि नयति तत्र चतुर्भुजम् भवति। एवम् चतुर्भुजेन ब्रह्मादिनाम् अभिनयम् कर्तुम् शक्नोति। भानुदत्त मिश्रेण रोमांचादि सात्विक भावान् अनुभावत्वेन स्वीकृतम्। अनुभावानाम् स्वरुपम् भेदान् च बिबिच्य श्रृंगारादि

---

1 अनुभावयन्ति अनुभवगोचरता नयन्ति रसान इति अनुभावा:। — रसरत्नप्रदीपिका, 2/पृ 8।

2 अनुभावो विकारस्तु भावससूचनात्मक:। — दशरुपक, 4/3 ।
भ्रू विश्वपकटाक्षादि र्विभावोह हृदयं श्रित:।
भावान् व्यनक्ति य:सोयमनुभाव इतीरित:। — भावप्रकाशन, 1/पृ 13।

3 ते अनुभावा: कायिकमान साहार्यसात्त्विक भेदाच्चतुर्था। वही।

4 कायिक। भुजक्षेपादय: मनसा: प्रमोदादय:। वही।

5 नाटये चतुर्भुजत्व ज्ञानादय आहर्या:, सात्त्विका, रोमाञ्चादय:। वही।

6 अनुभावेषु ... .. .. बाह्या मनोवाग्बुध्दिशरीरारम्भा:। बी राधवन, — शृङ्गारप्रकाश, पृ 517।
अनुभावश्चतुर्धा स्यान्मनोवाक्कायबुध्दिभि:। — भावप्रकाशन, 1/पृ 6।

7 मन आरम्भानुभावा भावाद्या दश योषिताम्। वागारम्भावाश्च द्वादशालप पूर्वका:॥
गात्रारम्भानुभावाश्च लीलाद्या दश योषिताम्। बुध्यूयारम्भानुभावाश्च रीत्तिप्रवृतयव:॥
भावप्रकाशन, 1/पृ 6।

8 स्थायिभाव: परिपूर्णो रस:, तस्य चान्तत्वाज्ज्ञाकेन विना कथं ज्ञानमित्यनुभावस्यापेक्षणीयत्वात्।
रसतर , 3/पृ 23।

9. नाट्ये चतुर्भुजत्वज्ञानादय ह्याहार्या:। — रसतर , 2/पृ 24।

अनुभावानाम्:निरुपणम् उपन्यस्तम्। धनंञ्जय हेमचंद्र, विश्वनाथ रुय्यक आदिभि: आचार्यौ: सात्त्विकानभावान् एव अनुभावत्वेन स्वीकृतम्[1]। भानुदत्तमिश्रेण यद्यपि श्रृगारदि रसानाम् कायिक, मानसिक, आहार्यादि सात्विक अनुभावानाम् पृथक् - पृथक् विवेचनम् नैवकृतम्। अपितु सर्वेषाम अनुभावानाम् परिगणनम् एव कृतम्। शृंगाररसस्य अनुभावत्वेन केवलं संभोग श्रृंगारस्य अनुभावानाम् विवेचनम् कृतम् वर्तते। स्मित धृति, प्रमोद तदा विविध प्रकाराणाम् अंगविकाराणाम् अभिनया: कर्तव्य:[2]। आचार्य अभिनवगुप्तेन मधुर वचनस्य प्रिय वाक्यत्वेन अर्थधटनम् कृतम् वर्तते[3]।

भानुदत्तमते धृति, प्रमोदादि, अनुभावं एव[4]। भानुदत्तमिश्रेण कटाक्ष भुजक्षेपादि सात्त्विकभावानाम् श्रृंगाररसस्य अनुभावत्वेन एव मन्यन्ते[5]। आचार्य भरतमुनि मते चातुरी भ्रूविक्षेप, श्रृंगाररसस्य अनुभावत्वेन स्वीकृतम्[6]। धनञ्जय् शारदानय विश्वनाथ अल्लराज् आदिभि: आचार्यौ: कटाक्ष मधुरं अंगचेस्टा आदि संभोग श्रृंगाररसस्य अनुभावत्त्वेन स्वीकृवन्तै[7]। भानुदत्तमिश्र प्रतिपादित मुक्ताहारा: इत्यस्मिन श्लोके नायक विषयक नायिकया: रति: अनुभावा: कटाक्षामेव। हास्यरसस्य उत्पति: विकृतं आकार वाक्य अंगविकार विकृतवशात भवति। विकृत आकार वाक्यादि सामाजिकानाम हृदये हास्यम् उत्पादयन्ति तदानीम् ते उदीपन विभावत्वेन संबोध्यन्ते। आचार्य भानुदत्तमिश्रेण कटाक्षादिम् उद्दीपन विभावत्वेन स्वीक्रियते कारणम् एते रसम् उद्दीपयन्ति मनुष्य विकृतवाक्यम् श्रृत्वा इदम् अनुमीयते यत् व्यक्ति: हास्यं करोति अथवा हासितुम् इच्छत्ति तदानीं इते विकृतवाक्यादिनीं अनुभावत्वेन स्वीक्रियन्ते। आयार्य भरतमतानुसारेण ओष्ठ, नासा, अस्यराग, पार्ष, गृहणनादिभि: अनुभावभि: अविनया: प्रयुक्तव्य: एवम् प्रकारेण हास्यरसस्य अनुभावम् प्रयुक्तम्[8]।

---

1 परिच्छेद 5। अनुच्छेद 1।

2 नयनवदन प्रसादै: स्मितमधुखचोधृतिप्रमोदैश्च। विविधैररङ्गविकारैस्त स्यभिनय: प्रयोक्तव्य ।।रसतर 3/2।

3. मधुरणि च श्रवणसुखकरणि यानि वाक्यानि। वही, 6/पृ 551।

4 देखिये, परिच्छेद 4। अनुच्छेद 7।

5. कटाक्षभुजक्षेपादय उह्नीया:। रसतर 3/पृ 5।

6 नयनचातुर्यभ्रूक्षेपकटाक्षसञ्चार। नाट्यशास्त्र, 6/पृ 3 5।

7 दशरुपक, 4। 48। भावप्रकाशन, 3/पृ 59। साहित्यदर्पण,3/195। सङ्गीतरत्नाकर, 7/1392-93। रसरत्नप्रदीपिक।, 3/पृ 8।

8 तस्योष्ठनासाकपोल स्पन्द दृष्टि व्याकोशाकुञ्चनस्वेदास्यरागपार्श्वग्रहणादिभिरनुभा वैर भिनय: प्रयोक्तव्य:। नाट्यशास्त्र,6/पृ 613।

आचार्य भानुदत्तमिश्रेण करुण रसस्य अनुभावानाम् विवेचनम् नि:श्वास आहा: रोदनम् मुच्र्छपरिवेदनम्[1] । करुणरसस्य अनुभाव रुपेण कृतम् वर्तते[2] । नाट्यशास्त्रमतानुसारेण उच्चस्वरै: रोदनम् मुच्र्छा विलपनम् । शरीरस्य पातनम् आदिभी: करुणरसस्य अनुभावत्वेन स्वीक्रियन्ते[3]। आचार्य भरतमुनिना मुखस्य वैवर्ण्य, अनुभावत्वेन स्वीकुर्वन्ति[4] । रुद्रट, धनञ्जय, आदिभि: आचार्यै: करुणरसस्य अनुभावत्वेन इदमेव स्वीकृतम्[5] । भानुदत्त मिश्रेण तातेर्निगच्छति इत्यादिभि: श्लोके: करणरसस्य सोदाहरणम् प्रदर्शनम् कृतम् । रौद्ररसस्य अनुभावत्वेन भानुदत्त मिश्रेण भरतमुनि प्रतिपादित व्याख्यानम् एव स्वीकृतम् । तन्मतानुसारेण शिरस्य कंपनम् कराग्रनिष्पपीडनम् रौद्ररसस्य अभिनयत्वेन स्वीक्रियते[6] । आचार्य भरतमुनिमतानुसारेण शस्त्रादिनाम चालनम् रोमांच सैर परिवर्तनम् भयानकरसस्यअनुभावा: एव । आचार्य भरतेन भयानकरसस्य अनुभावत्वेन अस्यगणना कृता वर्तते । आचार्य भानुदत्तस्य विवेचन शृंखलायाम् यद्यपि किमपि नावीन्यम् नैवदर्श्यते । तथापि न्यस्त व्यस्त इत्यस्मिन श्लोके गोनिष्ट भयम् अनुभावत्वेन स्वीक्रियते । अद्भुतरसस्य अनुभावत्वेन आचार्य भानुदत्तमिश्रेण नाट्यशास्त्रय आर्या, एव स्वीकृतम् । तेन आर्या: पाठभेदत्वेन उद्वीप्तम् करोति । स्पर्श ग्रहण उल्लास हाहाकार साधुवाद कम्पन, गद्गद्वचन तथा स्वर भेदेन तस्य अभिनयम् कर्तव्यम्[7] । नाट्यशास्त्रे स्पर्श ग्रहणोल्लासै: स्थाने तद अपेक्षया स्पर्शग्रहा -होल्लुकसनै: तथा स्वरभेदै: तदस्थाने स्वदादै: पाठभेदत्वेन् स्वीकृतम्[8]। भरतेन नयनविस्तारत्वेन अपलक नेत्रेण रोमांच अश्रु हर्ष, दान, हस्त, आदिनाम अद्भूत रसस्येवे एव गणना भवति[9] । रुद्रट धनञ्जय आदिभि: आचार्यो: अनुभावात्वेन विवेचनम् कृतम्[10] । भानुदत्त मिश्रेण, अल्लराजस्य अनुसरणम् कृत्वा लौकिकरसमेव दृष्टिम् अभिलक्ष्य अनुभावादिनाम्

---

1. काव्यानुशासन तथा टीका, 2/ पृ 89 । भावप्रकाशन, 1/पृ 5 । नाट्यशास्त्र 3/12 ।
   रसरत्नप्रदीपिका, 3/पृ 8 ।
2. नि:श्वसितश्वसनरुदितैर्मोहागमन परिदेवनैश्चैव । अभिनये: करुणरसो देहाधातादिभिश्चैव ।। रसतर. 3/6 ।
3 सस्वनरुदितैर्मोहा गमैश्च परिदेवितैर्विलपितैश्च । अभिनेय: करुणरसो देहा यासाभिधातैश्च ।।
   नाट्यशास्त्र,6/63। नाट्यशास्त्र(रधुवंश), 6/62 । अभिनवभारती,6/पृ 581।
4. मुखशोषप्रलापवैवर्ण्यादय ऊहनीया: । रसतर 3/30 ।
5. श्रृङ्गरतिलक, 3/10 । दशरुपक, 4/81 । काव्यानुशासन, 1/पृ.91 । भावप्रकाशन,3/पृ.63-64 ।
   नाट्यदर्पण, 6/14 । साहित्यदर्पण,72/2224 । सङ्गतरत्नाकर, 7/1436-37 ।
   रसरत्नप्रदीपिका,3/पृ 9 ।
6 रसतर. 2/7 ।
7 नानाप्रहरणसंकुलशिरस: कम्पै: करग्रनिष्पेषै: । धोरैरर्थविशेषैस्त स्याभिनय: प्रयोक्तव्य: ।। रसतर , 3/8 ।
8 स्पर्शग्रहणो ल्लसेहहिकारैश्च साधुवादैश्च । वेपथुगद्गद्वचनै: स्वरभेदैरभिनयस्तस्य ।। रसतर ०,3 । 18 ।
9 नाट्यशास्त्र, 6/ 76 । नाट्यशास्त्र,(रधुवश) 6/ 76 । अभिनवभारती,6/ 605 ।
10. तस्य नयनविस्तार निमेषप्रेक्षणरोमाञ्चा श्रुस्वेदहर्ष साधुवाददानप्रबन्धहाहाकारबाहुवदनचेला -
   भ्रमणादिभिरनुभावैरभिनय: प्रयोक्तव्य: । नाट्यशास्त्र, 6/ पृ 328 ।

विवेचनम् कृतम् वर्तते[1]। तेन अनुभावस्य कायिक, मानसिक आहार्य सात्विकादि चत्वारो भेदा: स्वीकृता:[2] । भरतादिभि: आचार्यै: आहार्यम् अभिनयत्वेन स्वीकृतम्। परंतु भानुदत्तेन अनुभावत्वेन तस्य गणना कृता वर्तते।

## सञ्चारीभाव निरुपणम्

स्तम्भ स्वैद, रोमाञ्च, स्वरभेद, वेपथु:, वैवर्ण्यम्, अश्रु, प्रलय इत्यष्टैव[3] सात्विकभावा: स्मृता:। सत्वगुणा एतद् सात्विका:। परदु:खे दु:खी सुखे सुखी इत्यत्र अनुकुलत्वेन सात्विक भावा: स्मृता:। समस्तेषु रसेषु संचरन्ति व्याभिचारिभावा:। एकाग्रतायाम् उत्पन्न: भवति। परं दु:खम् दृष्ट्वा मनसि तादृशी एव भावना दु:खानुभूतिश्च्च समुत्पन्ना भवति। सैव सात्विक भावत्वेन स्वीक्रियन्ते। रोमाञ्च अश्रु पातादिभि: सात्विक अनुभावत्वेन स्वीक्रियन्ते। अल्लराजमते परगत् दु:खभावनायामत्यन्तानुकुलत्वम् पर दु:खम् दृष्ट्वा निर्वेदादि व्यभिचारीभिश्च उत्पद्यन्ते[4] । आचार्य भानुदत मिश्रमते सत्वस्य अर्था: जीवा: शरीरमएव तस्माद कारणाद्एव शारीरिक भाव स्तंभादि सात्विक भावत्वेन स्वीक्रियन्ते भावत्वेन स्वीक्रियन्त[5]। स्थायिभाव तथा व्याभिचारीभावादया: आंतरिक धर्म रुपेण नैव स्वकर्तुम् शक्यते[6]। भानुदत मिश्रेण सत्वस्य सर्वथा नवीनरुपेण एव स्पष्टीकरणम् कृतम्। भरतेन सत्वम् मन: प्रभव इति युक्तम् तन्मते समाहित मनसा: सत्वस्य निष्पति: भवति। तस्माद् एव सुख-दुखेण सत्वयुक्त भावा: सात्विक भावत्वेन स्वीक्रियन्ते। पुलक अश्रु एतस्माद् एव जायते। अत: तामपि सात्विक भावत्वेन स्वीक्रियन्ते[7]। सुख- दु:खेन रोमांच अश्रुआदि उत्पद्यन्ते अत: तमअपि सात्विक भावत्वेन स्वीक्रियते। भोजराजेन सत्वस्य अर्था, सत्वगुण युक्त मना: इति कृतम्। विश्वनाथेन विश्रान्तं लभताम् धर्मा: इति सत्वम्[8]। भानुदत्तेन सत्वस्य अर्था: शरीरम् कृतम्। रोमांञ्चादि

---

1. श्रृङ्गारतिलक,3/30। दशरुपक, 4/79। काव्यानुशासन, 2/पृ 95,96। नाट्यदर्पण, 6/19। साहित्यदर्पण,3/244।
2. देरिवए, अनुच्छ्द 1
3. वहि ,-2।
4 स्तम्भ: स्वेदोडय रोमाञ्च: स्वरभेदोडथ वेपथु:। वैवर्ण्यमश्रु प्रलय इत्याष्टौ सात्विका मता:।
रसतर०,4/ 1 । नाट्यशास्त्र, 6/22 ।
5. न च परदु:खभावनायामष्टावेते समुत्पधन्त इत्यनुकूलशब्दार्थ:। अत एव सात्विकत्वमायेप्तेषामिति वायम्। निर्वेदादेरपि परदु:भावनायामप्युत्पतेरिति। रसतर ०, 4/पृ 34।
6. *वहि।*
7. इह हि सत्व नाम मन: प्रभवम्। तच्च समाहितमनस्त्वादुच्यते। मनस: समाधौ सत्वनिष्पतिर्भवति। तस्य च योडसौ स्वभावो रोमाश्रुवै वर्ण्योदिलक्षणो यथाभावोपगत:। नाट्यशास्त्र, 7/पृ 375 - 76।
8 सत्व नाम स्वात्मविश्रामप्रकाशकारी कश्चनान्तरो धर्म:। साहित्यदर्पण, 3/पृ 201।

सात्विक भावानाम् विवेचनं भानुदतेन इहम् सपष्ट्म् कृतम् यत् हर्ष, भय, क्रोध, आदि मनोविकारेण समुत्पन्ना: शारीरिक विकारा: एव सात्विक भावा:[1] । शीतादि बाह्ये कारणत्वेन उत्पन्ना: रोमांचादि सात्विक भावत्वेन नैव बोध्यन्ते । व्यक्ति: स्वेच्छया चेष्टादिकम् करोति । अत: तत्र उत्पन्न चेष्टा शारीरिक भावान् एव अनुभावत्वेन स्वीकृतम् हर्ष राग आदि मनोविकारात् उत्पन्न: स्तंभादि शारीरिक विकारा: सात्विक भावा: एव तत्र व्यक्ते: हर्ष रागादि कारणात् अनुभावत्वेन स्वीक्रियते । धनिक शारदातनयविश्वनाथ आदिभि: आचार्यै: सात्विक भावानाम् अनुभावत्वेन् स्वीकृताम् । आचार्य धनिकमते एते स्तंभादया: अवुभावत्वेन उत्पद्यन्ते । अत: अनुभावत्वेन कथ्यन्ते[2] । शारदातनय तथा विश्वनाथमते सात्विकभावा: अनुभावा: एव कवल सत्वोपेतेन उत्पन्ने सात्विक भावा: गोबलीवदन्याये अनुभावेन पृथक् विवेचनम् क्रियते[3] ।

## (1) स्तम्भ: –

शरीरधर्मत्वेसति गतिरोधा: एव स्तभा:[4] । हर्ष, राग, भय, दु:ख विषाद्, विस्मय तथा क्रोध, आदया: अस्य विभावा:[5] । शरीर धर्मत्वे सतिपदेन लक्षणम् इदम् निद्रा तथा अपस्मर व्यभिचारि भावे अति व्यप्तौ नैव भवति[6] ।भानुदत्तमिश्रेमतेन इन्द्रियानि मन: त्वचायाम् यदा गच्छति तदा कथ्यते[7] । भूतादि आवेषभेमषेण उत्पन्न चितस्य अवस्था विशेष अपस्मरा: स्तंभे शरीरस्य गति: अवरोधोजायते । गमन क्रियायाम् अवरोम एव स्तंभा: प्रलये चेष्टाया: निरोधो भवति[8] । भानुदत मिश्रेण स्तंभस्य सर्वदानवीनरुपेण स्पस्टता कृतम् । भरतमतानुसारेण संज्ञाहीनम् तथा कंपनरहितम् स्थिति शरीरपतनात् भवति[9] । हर्ष, भयादि स्तंभस्य कारणम्[10] । एव भोज शारदातनय, विश्वनाथ रुय्यक, आदि मतानुसारेण राग, हर्ष, आदि कारणात् चेष्टायाम्

1 विकारसमुत्थरोमोत्थान रोमाञ्च: । रसतर ० 4/ पृ 36 । विकादप्रभवप्रकृतवर्णान्यथाभावो वैवर्ण्यम् । वही, 4/ पृ 38 ।

2. भावससूयनात्मकविकार रुपत्वाच्चानुभावा इति द्वैरुप्यमेषाम् । अवलोक – टीका, दशरुपक, 4 /पृ 235 ।

3 अनुभावत्व सामान्ये सत्यप्येषा पृथक्तया । लक्षण सत्वजत्वध्द्रि तेडपि स्तम्भादय: स्मृता: । भावप्रकाशन, 1/ पृ 14 ।
सत्वमात्रोम्द्रावत्वात्ते भिन्ना आयनुभावत: । साहित्यदर्पण, 3/ 135 । "गोबलीवर्दन्यायेन" इति शेष: । वही, 3/पृ 201 ।

4 शरीरधर्मत्वे सति गतिनिरोध: स्तम्भ: । रसतर ०, 4/पृ 35 ।

5 तस्य विभावा हर्षरागभयदु:खविषादविस्मय क्रोधा: । वही ।

6. न च निद्राडपस्मारादावतिव्याप्ति:, शरीरधर्मपदेन व्यावर्तनात् । वही ।

7 इतरदिन्द्रियमपहाय मनस्त्वपि यदा वर्तते तदा निद्र । वही, 5 / पृ 68 ।

8 प्रलयभावे तु चेष्टानिरोधो न तु गतिनिरोध: । वही 4/41 ।

9. नि: सज्ञो निष्प्रकम्पश्च स्थित: शून्यजडाकृति: । स्कन्नगात्रतया चैव स्तम्भ त्वभिनयेद्बुध: ।। नाट्यशास्त्र, 7/101 ।

10. हर्षभयशोकविस्मयविषादरोषा दिसम्भव: स्तम्भ: । वही, 7/96 ।

अवरोधो हिस्तंभा:[1] ।

## (2) स्वेद –

शरीरात् स्वेद बिन्दुनाम पतनम् स्वेदा: । वपुषि सलिलोद्गमा: स्वेदा: लज्जा संकोच, क्रोध, आवेग, भय, श्रमादि[2] कारणाद शरीरात स्वेद इत्यस्य लक्षणम् पूर्वाचार्यै: यथा कृतम् तथैव एव कृतम् भरतमुनिना भय क्रोध, आदि संवेगान स्वेदस्य कारणभूतम् तत्वम्[3] । एव स्वीकृतम् शारदातनय तथा सारंङ्गदेवेन भरतमतानुसारेण एव स्वेदस्य विवेचनम् कृतम् वर्तते[4] । भोजराजेन, रामचंद्र, गुणचंद्र, विधानाथ आदि आचार्यौ: इत्यदि उत्पन्न शरीरात् जलबिन्दुनाम् निपतनम् स्वेदा: इति कथ्यते[5] ।

## (3) रोमांञ्च: –

विकार कारणात् शरीरे जायमानम् रोमाञ्चम् एव रोमाञ्चत्वेन कथ्यते[6] । शीत आलिंङ्गन, हर्ष, भय, क्रोध, आदि अस्य विभावा:[7] । शीतोष्ण सुख – दु:खात् व्यक्ति: रोमांचितो भवति । सारंङ्गदेवेन भरतस्य मतम्एव स्वीकृत्य रोमांञ्चस्य स्वरुपम् स्पष्टीकृतम्[8] । भोज शारदातनय आदि आचार्यै: हर्षादि कारणात् रोमविक्रयायाम् रोमांञ्चोअयम् सात्विकभावा: इति प्रोक्तम् । विकार कारणात् जायमानम् रोमोत्थानम् एवरोमांञ्च: इति रसतरंगिणीकार भानुदत्त मिश्रमतम् । शीत आलिंगन हर्ष, भय तथा क्रोधादि अस्य विभावा: । साहित्यकारणात् अथवा आलिंगन सुखत् हर्ष, भय, तथा क्रोधादिक्यात् व्यक्ति: रोमांचितो भवति । शीताधिक्यात् अपि रोमोत्थानम् जायते । परंतु तत्र सात्विक भावा: इत्यस्य प्रयोगा: न क्रियते । शीतजनित रोमाञ्चात्

1. स्तम्भश्चेष्टप्रतिधातो भयरागामयदिभि: । सरस्वतीकण्ठामरण, 5/142 । भावप्रकाशन, 2/पृ. 31 । साहित्यदर्पण, 3/136 । साहित्यमीमासा, 6/पृ. 55 ।3. अस्य विभावा मनस्तापहर्षलज्जाक्रोधभय श्रमपीडाधातमूर्च्छ्रा: –रसतर ०,पृ 36 ।
2 क्रोधभयहर्षलज्जा दु:खश्रमरोग तापधातभ्य: । व्यायाम्क्लधर्मै: स्वेद: सम्पीडनाच्चैव ॥ वही, 7/95 ।
3 भावप्रकाशन, 1/पृ 14 । सङ्गीतरत्नाकर, 7/ 1656–58 ।
4. वपुर्जलोद्गम: स्वेदो रतिधर्मश्रमादिभि: । सरसवतीकण्ठभरण, 5/143 । नाट्यदर्पण, 3/49 । साहित्यदर्पण, 3/137 । प्रतापरुद्रीय, रसप्रकारण पृ 59 ।
5. विकारसमुत्थरोमात्थान रोमाञ्च: । रसतर ०, 4/ पृ 36 ।
6. अस्य विभावा: शीतलिङ्गनहर्षभयक्रोधा: । वही ।
7. सङ्गीतरत्नाकर, 7/1658 – 59 ।
हर्षद्भूतभयादिभ्यो रोमांञ्चो रोमविक्रिया । सरस्वतीकण्ठ भरण,5/143 । रोमाञ्चा रोमनिर्गम: । भावप्रकशन, 2/पृ. 31 । रसाहित्यदर्पण, 3/137 । प्रतापरुदीय, रसप्रकरण, पृ 172 ।

सात्विकभावा: नोत्पद्यते। भानुदत मिश्रेण शरीरस्य रोमोत्थानम् भानुदतमिश्र मते शरीरस्य रोमोत्थानम् एव ही रोमाञ्च:। मिश्र महोदयेन पूर्वाचार्याणाम् एव हि अनुसरणम् कृतम्। आचार्य भरतमते स्पर्श, भय, शीत, हर्ष, आदिभि: रोमाञ्चस्य कारणम्[1]। सारंङ्गदेवेन भरत सदृशम् इव रोमाञ्चस्य स्वरुपम् निदर्शितम्। भोज, शारदातनय, आदिभि: आचार्यै: हर्षादि जनित। रोमोत्थानस्य विकार एव रोमांचने केवलम् एतद् एवम् वैशिष्टियम् वर्तते। यत आदिभि: विकारात् समुत्पन्नम् रोमांञ्चम्। एव सात्विक भावा: इति प्रोक्तम्।

## (4) स्वरभङ्ग: -

गद्गद् कारणात् जायमानम् स्वर परिवर्तनम् एव स्वरभंङ्ग: उच्यते[2]। क्रोध, भय, हर्ष तथा मदादि विभावत्वेन प्रसिध्धा:[3]। स्वर परिवर्तन एव स्वरभंङ्गा गद्गद्त्व इत्युते[4]। मुखात् स्पष्ट शब्दस्य उच्चारणम् नैव जायते[5]। क्रोधे भयस्य अवस्थायाम् हर्षातिरेके तथा भेदे व्यक्ते: स्वर परिवर्तनम् जायते। एतस्मिन् जायमाने स्वर परिवर्तने। कण्ठा अवरोधा जायते। स्पष्टीकरणे गद्गद् इत्यस्य प्रयोगेण कृतम्[6]। भय, हर्ष, क्रोधादिएव अस्य कारणम् तन्मते भय, हर्ष, क्रोधादि एव अस्य कारणम्[7]। भोज, विश्वनाथ, आदि आचार्यै: स्वरभंङ्ग: एव उक्तम् शारदातनय रामचन्द्र, गुणचन्द्र, आदिआचार्यै: स्वर परिवर्तनम् एव स्वरभंङ्गादि उक्तम्[8]।

## (5) वेपथु:-

शरीरस्य कंपनम् एव वेपथु: । विकार कारणात् शरीरे कंपनम् जायते[9]। नेत्रस्फुरण आदि रसानुकूलो व्यापारादिनाम शरीर तथा शरीरस्य अवयवानाम् कंपनम् एव वेपथु:।

1. स्पर्शभयशीतहर्षात् क्रोधाद्रोगाच्च रोमाञ्च: ॥ वही, 7/98।
2. गद्गद्त्वप्रयोजकीभूतस्वरस्वभाववैजात्य स्वरभंङ्ग:। रसतर ०,4/पृ. 36।
3 अस्य विभावा: क्रोधभयहर्षगदा:। वही।
4 मिलाइये, भाषा – टिका, 4/पृ 61।
5 संस्कृत – शब्दार्थ – कौस्तुभ, / पृ 383।
6. स्वभेदोडभिनेतव्यो भिन्नगद्निस्वनै:। नाट्यशास्त्र, 7/104।
7 स्वरभेदो भयहर्षक्रोधजरारौक्ष्यरोगमदजनित:। वही,7/99।
8. य: स्वरो भिद्यतेस्थानात्स्वरभेद: स कथ्यते। भावप्रकाशन, 2/पृ. 31। स्वरभेद: स्वरन्यत्वम्। भदादेर्हर्षहास्यकृत। नाट्यदर्पण, 3/47।
9 भावत्वे सतीति विशेष गदानात् सूचकस्पन्दादौ नाडतिव्याप्ति:। वही।

आलिंगनम्, हर्ष, भयम्, अस्य विभावा:। हर्षातिरेकेण आवेगेन भयानुकुलेन शरीरे कंपनम् भवति[1]। आलिंगनस्य सुखम् अपि वेपथु: इत्यस्य जनकम्[2]। आलिंगनम् हर्ष भयदि अस्य विभावा:। शरीरात् जायमानम् कंपनम् एव वपथु इति भानुदत मिश्रेण पूर्वाचार्याणाम् मतस्य अनुसरणम् कृत्वा प्रोक्तम्। आचार्य भरतमते कंपनस्य, स्फूरणम् वेपनम् एव वेपथु:। आचार्य भरतमुनि: हर्ष भयादि कारणात् वेपथु:[3] इत्यस्य आर्विभावा: प्रोक्तम्। भोज, रामचन्द्र, गुणचन्द्र विश्वनाथादि आचार्यै: रागादि कारणात् शरीरात् जायमानम् कंपनम् एव वेपथु:[4]। इति प्रोक्तम्। वेपथु: इत्यस्य लक्षणम् प्रतिपादयता: तेन स्पष्टीकृतम् यत् शरीरम् तथा शरीरस्य शरीरम् तथा शरीरे अवयव। नाम कंपनम् एवहि वपेथु:।

## (7) वैवर्ण्य :—

प्रकृत् वर्णस्य परिवर्तनम् एवहि वैवर्ण्यम्। प्रत्येक मनुष्यस्य स्वभाविकम् वैशिष्ट्यम् भवति। प्रत्यक शरीरे वैवर्ण्यम् जायते। वर्णस्य परिवर्तनम् एव वैवर्ण्यम्। मोह, भय, क्रोध, शीत, ताप, श्रम,[5] आदिषु विकार प्रभावात् समुत्पन्नम् वैवर्ण्यम् सात्विक भावानाम् श्रेण्याम् आद्यपि नैव युक्ति युक्तो प्रतिभाति।

## (8) अश्रु :—

विकारात समुत्पन्नम् नेत्र जलबिन्दुनाम पतनम् एव अश्रु कथ्यते[6]। अश्रु विकारस्य विभावत्वेन हर्ष, अमर्ष, धूम, भय, शोक, जृम्भा, शीत निरंतर अवलोकनम् समाबिष्यते[7]। धूमादि कारणात् अश्रु बिन्दुनाम् निपाता: अश्रुत्वेन नैव संबोध्यते[8]। हर्ष, अमर्ष

1. व्यारव्या — नाट्यशास्त्र (रघुवश), 7/पृ. 493।
2 रसतर०, 4/6।
3. शीतभयहर्षरोषस्पर्शजरारोगज:। कम्प:। वही 7/96।
4. रागरोषभयादिभ्य: कम्पो गात्रस्य वपेथु:। सरस्वतीकण्ठाभरण, 5/144। नाट्यशास्त्र, 3।46। साहित्यदर्पण, 3/138। प्रतापरुद्रीय, रसप्रकरण, पृ.172।
5. अस्यविभावा मोहभयशीततापश्रमा:। रसतर 4/पृ. 38।
6. विकारजनितमक्षिसलिलमश्रु। रसतर, 4/पृ. 38।
7. अस्य विभावा हर्षामर्षधूपभयशोकजृम्भाशीतनिर्निमेषप्रक्षणानि। वही, 4/पृ 44,45।
8 मिलाईए, भाषा — टिका, 4/पृ 63।

तथा मनोविकारात् समुत्पन्ना: अश्रु एव ही सात्विक भावत्वेन उच्यते। शीत, धूम, निरंतर अवलोकनम् एव सात्विक भावान्। नेत्र जलबिन्दुनाम् पतनम् भानुदत मिश्रेण अश्रु इति उक्त्वा पूवाचार्याणाम् एव अनुसरणम् कृतम्। आनंद, हर्षादि अश्रु पतनस्य कारणम्[1] । भोज, रामचन्द्र, विद्यानाथ, विश्वनाथादिभि: आचार्यै: क्रोध समुत्पन्नात् जायमानम् जलबिन्दुनाम् पतनम् एव अश्रु इति प्रोक्तम्[2] । भानुदत मिश्रेण विकार जन्यम् अश्रु एव सात्विक भावत्वेन प्रोक्तम्।

### (9) प्रलय :–

शरीरत्वे सति चेष्ठाविरोध: प्रलय:[3] । शरीरचेष्ठाया: निरोधत्वेन प्रलय: जायते। प्रलय समये इन्द्रियान् संतज्य मना: त्वचायाम् गच्छ्ति तदानिद्रा जायते। शरीरस्य चेष्टा यदा विरुध्धो भवति तदा प्रलय इति प्रोच्यते एवम् प्रलयस्य अपरस्मारदिषु पर्याप्तं विद्यते। मनस्य निरोधा: प्रलयम। इदम् स्पष्टी करणे भानुदतेन उक्तम् स्तंभादि शरीरस्य धर्मा:[4]। प्रलयादि: अपि स्तंभादि श्रेण्याम् स्थापयितुम् शक्यते। एषा: एव शरीरधर्मा:[5] । चेष्टा पदात् शरीरस्य चेष्टाहि अभिमतम्[6]। द्वितीयम् मनस्यकम गतिरुको[7] भवति न चेष्टा रुपो[8]। चेष्टाया: आश्रयम् शरीरम् एव इदमेव् शास्त्रीयम् लक्षणम्[9]। प्रलयस्य विभावा: सन्ति। राग, उत्कण्ठा आदि[10] । भानुदत्तमिश्रेण प्रलयस्य सात्विक भावस्य लक्षणम् अन्यै: आचार्यै: द्वारा कृतेन लक्षणम वैभिन्यम् प्रदर्शयते। भरतमुनिना उक्तम् प्रलयस्य अभिनयम् चेष्टाहीनात् कंपनम् विना श्वासस्य अस्पष्ट रुपात् तथा भूमि पतनम् इत्यनेन स्वीक्रियते[11]। तेन, श्रम, मूर्च्छा मद निद्रा आधात तथा मोहादीन प्रलयस्य विभावत्वेन प्रोक्तम्[12]। भरतेन स्पष्टीकरणम् यत् शरीर तथा मन उभयो:

1 आनन्दामर्षाम्या धुमाञ्जनबृम्भणाम्द्वयाच्छोकात्। अनिमेषप्रेक्षणता: शीताद्वोगाम्द्रवेदश्रु। वही, 7/97 ।

2. अश्रु नेत्रोद्गत वारि दु:खशोकप्रहर्षजम्। सरस्वती कण्ठाभरण, 5/145। नाट्यदर्पण, 3/48। साहित्यदर्पण, 3/139। प्रतातरुद्रीय, रसप्रकरण, पृ 172।

3 शारीरत्वे सति चेष्टानिरोध: प्रलय:। रसतर ०, 4/पृ 38।

4. स्तम्भादय: शरीरधर्मास्तेषा साहचर्यकथनेन प्रलयोडपि शरीरधर्मएव। रसतर ०, 4/45।

5. वही।

6 तेनाडत्र चेष्टा पदेनशरीरचेष्टेवाडभिमता। वही।

7. चलनात्मक कर्म। तर्कभाषा, पृ 213।

8 मनसस्तु कर्म भवति , न तु चेष्टा । रसतर० , 4/पृ 38।

9. अत एव चेष्टाश्रय: शरीरमिति शास्त्रीय लक्षणम्। वही।

10 अस्य विभावा रागौत्कण्ठ्यादय:। रसतर०, 4/पृ. 38।

11 निश्चेष्टो निष्प्रकम्पत्पत्वादव्यक्तरवसितादपि। महीनिपातनाच्चापि प्रलयाभिनयो भवेत्॥ नाट्यशास्त्र, 7/107 ।

12. श्रममूर्छामदनिद्वाभिधातमोहादिभि: प्रलय:। वही, 7/99।

कार्य व्यापारयो: जायमाना: अवरोधा: प्रलयत्वेन संबोध्यते। विश्वामित्रमते सुख दु:खयो चेष्ठायान यो: अभावात् प्रलया:[1]। धनञ्जयेन चेतना संज्ञाया: नष्टत्वेन् प्रलया: जायते[2] । शारदातनय आचार्येण वाणी शरीर तथा मनस्य चेष्टाया: नष्टत्वेन प्रलयावस्था भवति[3]। भोजराजेन दु:खस्य तीव्रतायाम् इन्द्रियाणाम् अस्तव्यस्तत्वेन प्रलया: जायते:। विद्यानाथेन इन्द्रियाणाम् मूर्छा: एव प्रलया:[4] । भानुदत्तमिश्रेण चेष्ठायाम् उत्पन्ना: अवरोधा: एव प्रलया:। "शरीरत्वे सति" पदेन तेन स्पष्टीकृतम् यत् शरीरस्य चेष्टाया: अवरोधा एव प्रलया:।

## (10) जृम्भा :–

भानुदत्तमिश्रेण जृम्भा सात्विक भावाम् अंतिमम् नवमम् सात्विक भावत्वेन उक्तम्[5]। जृम्भा सात्विक भावोऽयम् सात्विकभावत्वेन सिद्ध करणाया भानुदत्तेन युक्तिद्वयम् प्रस्तुतम्। जुम्भा शारीरिक विकारत्वेन उच्यते तथा मनस्य भावबोध करणाय अनुभावत्वेन उच्यते[6] । शारीरिक विकारा: कारणाद् एव जृम्भा एव हि सात्विक भावा: जृम्भाभावात् उत्पन्ना भवति। भावस्य समापने जृम्भाया: निवृत्ति: भवति। रोमांञ्चादि सात्विक भावानाम् प्रसंङ्गेषु भानुदत्तमिश्रेण समुत्पन्ना: विकार: तथा "विकार प्रभव:" इत्यस्य प्रयोगा: कृता: वर्तते[7]। अनेन स्पष्टम् भवति विकार मात्रेण जायमाना जृम्भा ही सात्विक भावत्वेन उच्यते। बालस्य मित्र आदि मनोविकारात् जायमानम् जृम्भा ही सात्विकभावस्य श्रेण्याम् स्थापयितुम शक्यते।

---

1 प्रलय: सुखदु:खाभ्या चेष्टज्ञाननिराकृति:। साहित्यदर्पण, 6/140 ।
2. प्रलयो नष्टसज्ञत्वम्। दशरुपक 4/6।
3 वाक्कायमनसा प्रलयो नष्ट्चेष्टता। भावप्रकाशन, 2/पृ 32।
4 प्रलयस्तीव्रदु:खादेरिन्द्रयास्तमयो मत:। सरस्वतीकण्ठाभरण, 5/145। प्रलय: सुखदु:खाद्यैर्गाढमिन्द्रियमूर्च्छनम्। प्र रु रसप्रकरण, पृ 171।
5. जुम्भा च नवम: सात्विको भाव इति प्रतिभाति। रसतर०, 4/पृ. 46।
6. सत्यनुभावत्वे भावत्वाविरोधात् पुलकादोना तथा द्रष्टत्वात्। रसतर०,।
7 देखिये, अनुच्छ्द, 2/3,5,6,7।

# व्यभिचारिभाव निरुपणम्

व्याभिचारिभावानाम् संख्या त्र्य: त्रिंशत भवति। निर्वेद, ग्लानि, शङ्का असूया, मद, श्रम, आलस्य, दैन्य, चिन्ता, मोह, स्मृति, धृति, व्रीडा, चपलता, हर्ष, आवेग, जडता, गर्व, विषाद औत्सुक्य,निद्रा, अपस्मार, सृप्त, विबोध, अमर्ष, अवहित्था, उग्रता, मति, व्याधि, उन्माद, मरण, त्रास, तथा वितर्क[1] । व्यभिचारि भावस्य लक्षणम् प्रतिपादयत: भानुदत्तमिश्रेण एवम् उक्तम् यत् रसानाम् संचारणेन तथा पृष्ट करणे अनेकेषु, रसेषु, व्याप्त, भावा: एव व्यभिचारी भावा:[2]। अत्र रसात् तात्पर्यम् रसानाम् स्थायीभावात् एव वर्तते। विशेषण रसेषु चरन्तिइति व्याभिचारीणा: आचार्य भानुदत्तमिश्रमते एते व्याभिचारिभावा: स्थायीभावेषु यत्र – तत्र संचरन्ति। एतेषां कोऽपि नियतस्थानम् नास्ति। आवश्यकत अनुसारेण एते समुत्पन्ना: भवन्ति। विलीनोऽपि जायन्ते। व्यभिचारि भावा: स्थायिभावान् पोषयन्ति। एते पोषयित्वा संचरन्ति। एते व्यभिचारिभावा: नियतस्वरुपेण एकत्र न भवन्ति। प्राया: सर्वत्र संचरन्ति। आचार्य भरतमुनि मते 'वि' 'अभि' उपसर्गद्वयेन गत्यर्थ च धातो: निष्पन्ना: भवति[3]। आचार्यै: अपि रसेषु विशेषरुपेण चरन्तिइति व्यभिचारिणा: इति प्रतिपादिता:[4]। दशरुपककारेण व्यभिचारीभावानाम् चित्रणम् निरुपयता एवं प्रोक्तम् यत् एते व्यभिचारि भावा:। समुद्रे जायमाना: तरंगानि इव। यथा समुद्रे स्थायिभावा: इत्युक्ते समुद्रम व्यभिचारिभावा: इत्युक्ते समुद्रे जायमाना: तरंगा:। व्यभिचारिणभावान् स्पष्टीकृत्य भानुदत्तमिश्रेण उक्तम् यत् स्थायीभावा: अन्यभावान् आत्मसात् कुर्वन्ति। व्यभिचारि भावानाम् आगमनम्शक्यंनास्ति परंतु स्थायिभावानाम् आत्मशक्ति: विद्यते[5]। यथा स्थायिभावा रुपेण सागरा: स्वकीयानी तरंगानि विलीनम् र्कतुम् शक्नोति। तथैव स्थायिभावा: अपि व्यभिचारिभावान् आत्मसात् कर्तुम् शक्नोति[6]। व्यभिचारिभावानाम् स्वरुप विवेचने भानुदत्तमिश्रेण प्रचलित् परंपराया: निर्वाह: एव कृता। स्थायिभावानाम् एतै: सह पोष्य – पोषक भावा शब्दबोधा: भवति। रोमांचादि व्यभिचारि

---

1. रसतर ०, पू/1–4। नाट्यशास्त्र, 6/18–21।
2 इतस्ततो रसेषु सञ्चारित्वमनेकरसनिष्ठन्वमनेकरसव्याप्यत्व व्याभिचारीत्वम्। रसतर०, पू/पृ 50। मिलाईए, भाषा पू /7।।
3 वि अभि इत्येतावुपसर्गौ। चर इति गत्यर्थो धातु:। – नाट्यशास्त्र, 7/पृ 355।
4 विविधमाभिमुख्येन रसेषुचरन्तीति व्यभिचारीण:। वही। विशेषादाभिमुख्येन चरन्तो व्यभिचारिण:। दशरुपक, 4/7। साहित्यदर्पण, 3/140।
5 इतरभावस्यात्मभावत्वोपनायकन्वे सति . . प्रथम:। न च व्याभिचारिणी सात्विकभावे वा व्यभिचार:। तस्येतभावस्यात्मभावत्वोपनायकत्वाभावात।_रसतर ०, 1/पृ 3 ।
6. आत्मभावडन्यत्यन्यान स स्थायीलवणाकर:। दशरुपक, 4/34।

भावा: एव रोमांचादिनाम् जीव—शरीरयो: साधर्मत्वेन[1]। आचार्य भोजराजेनअपि चिंता औत्सुक्य आवेग वितर्कादि भावानाम् आद्यन्तर व्यभिचारि तथा स्वेद रोमाञ्च अश्रु, वैवर्ण्य आदिषु बाह्यव्याभिचारि भावा: गणनायाम् उक्तम्[2]। स्थायी भावानाम् प्रसंगे भानुदत्तमिश्रेण इत्यादि अश्रृभावानाम् एव गणनाकृत:[3]। तत्र वर्णितानाम् व्यभिचारिभावानाम् स्वाऔमानम् निर्वेदा: हेत्वा बुध्धि निर्वेदा यथा संसारो अयम् त्याज्या नश्वरो अयम् संसारा[4]। नश्वर बुध्धि एव निर्वेदा: निर्वेदादिनाम् अश्रुभावा: स्वेद् प्रकाश, चिंता, अश्रुपाता:[5] दु:खवेगे अथवा भावावेषेव्यप्ति स्वयेद युक्तो भवति। धनंञ्जय हेमचंद्र विश्वनाथ आदिभि: आचार्यै: स्वकीया तिरस्कारम् एव निर्वेदा: मन्यन्ते[6]। द्वितीयो व्यभिचारिभावा: ग्लानि: निर्बलता कारणात् अथवा नि:सहाय वसात् ग्लानि जायते[7]। तृतीयो व्यभिचारिभावा: शंका: इष्ट वस्तुनाम् विनशने शंका जायते[8]। शंकायाम् दूजनता दूर्व्यवहारा क्रुर कार्यम् अपि जायते शंकायाम्[9]। कंपनम् गोपनमपि जायते[10]। भानुदत्त मिश्रेण चतुर्थो व्यभिचारिभावा: असूया अन्यस्य उत्कर्ष असूया जायते अन्यस्य अनिष्ट विचारा: एव सूया[11]। क्रोध दुर्जनतादि अस्य विभावा:[12]। पंचमो व्यभिचारिभावा: मद: हर्षस्य अधिक्यम् मदा:[13]। मद्यपानम् अस्य विभाव:[14]। मद्यपानात् हर्षाधिक्यम् यदा जायते तदा मद:। षष्टेव्यभिचारिभावा:श्रम: परिश्रमेण उत्पन्ना: शिथिलता एव श्रम[15]। अस्य विभावा: इति:मार्ग गमनम् अत्यादि[16]। श्रमा: अस्य विभावा: अस्य अनुभावा: स्वयेदा: सप्तमो व्यभिचारिभावा: आलस्यम् अक्षमता एव आलस्यम्[17]। गर्भधारणत् जायमाना[18]।

---

1 सत्व जीवशरीरम्। तस्य धर्मा: सात्विका:। वही, 4। 35।

2 तत्र आभ्यन्तरा व्याभिचरिषु: चिन्तौ त्सुक्यावेगवितर्कादय:, बाहया: स्वेदरोमाञ्चाश्रवैवर्ण्यादय:। श्रृङ्गारप्रकाथ, ।। /पृ. 445।

3 वही, 1/5।

4 स्वावमननम् निर्वेद: ससारे हेयत्वमुध्द्विर्वा निर्वेद:। रसतर, 5/ पृ 44।

5 अनुभावा: स्वेदप्रकाश चिन्ताश्रुपातादय:। वही।

6 तत्वज्ञानापदीष्यदिनिर्वेद:। स्वावमानम्। तत्र चिन्ताश्रुनि:श्वासवैवर्ण्योच्छ्वासदीनता:॥ दशरुपक 4/ 9। काव्यानुशासन, 2 /पृ 139 तथा टीका, 2/पृ 102। साहित्यदर्पण, 3/142।

7. तत्र विभावा रत्यायातृद्क्षुधादय:। वही।

8. उत्कटकोटिका निष्टप्रतिसन्धानमिष्टहानिविचारो वा शङ्का। रसतर०, 5/पृ 45।

9 मत्र दूर्नयपरत्रगैर्यादयो विभावा:। वही।

10. अनुभावा: कम्पक्रियाप्रच्छ्शदनादय:। रसतर०, 4/45।

11. परोत्कर्षासाहिष्णुता परानिष्टचिकीर्षा वा असूया। रसतर०, 5/पृ 45।

12. मत्र विभावामन्यदौर्जन्यादय:। वही। हर्षोत्कर्षो मद:। रसतर०, 5/पृ 46।

13. हर्षोत्कर्षो मद:। रसतर०, पू/पृ 46।

14. तत्र विभाव: पानम्। वही ।

15 आयासप्रभाव: पराभव: श्रम:। रसतर०, पू/पृ. 40।

16 तस्य विभावा इत्यध्वगत्यादय:। वही।

17 उत्थानाद्यक्षमत्वमालास्यम्। रसतर०, पू/पृ 48।

18 सस्कृत—शब्दार्थ—कौस्तुभ, पू/पृ 447।

जडताएव आलस्यं[1]। कार्यस्य संपादनाय मनसे अनिच्छा जायते तस्यनाम आलस्यम्[2]। अष्टमो व्याभिचारीभावा: दैन्यम् दूरावस्थाएव दैन्यम्[3]। दु:खस्य अचतरेका: दूरावस्था तदैव दांपत्यम्। निर्धनतादि अस्य विभावा: निर्धनतायाम् व्यक्ति: अत्यंत दु:खीतो भवति। नवमो व्याभिचारीभावा: चिन्ता: चिन्ता कारणात् स्मरणलोक भावात् चिन्ता जायते। चिन्तायाम् शरीरस्य तापमानम् वर्धते। अश्रु, निपात: अस्य अनुभावा:। इष्टवस्तूनाम अप्राप्ति अस्यविभावा: श्वास, तपनम् आदि अनुभावा:[4]। दशमो व्यभिचारीभावा: मोह। अनिच्छित वस्तुनाम् मोह: मोह्यते अर्थात् मोहा महोस्य विभावा अस्ति भयम् आवेग: अनुचिंतनम् आदि[5]। विश्वनाथेन भयादि कारणात् वैचित्र्यम् जायते[6]। अज्ञानम् मोक्षा, आदि मोहस्य कारणम् आचार्य शारदातनयेन चित्तस्य शून्यस्य मोह इति प्रोक्तम्[7]। एकादशो व्यभिचारी भावा: स्मृति:। संस्कार जन्यज्ञानम् स्मृति:[8]। संस्कार जन्य ज्ञानस्य प्रकारद्वव्यम् भवति। प्रत्यभिज्ञा रुपम् तथा स्मरणरुपम्[9]। द्वादशो व्यभिचारी भावा: धृति: सुखे – दु:खे लाभौ सर्वदा समान रुपेण धैर्य धारयति इति धृति:[10]। आचार्य धनञ्जय हेमचंन्द्र आदिभि: संतोष मूलम् एव धृति: इति प्रोक्तम्[11]। त्रयोदशो व्यभिचारीभावा व्रीडा: लज्जा कारणात् व्यक्ति: विनम्रो भूत्वा वदति तन्नाम् व्रीडा चर्तुदशो व्याभिचारीभावा: चपलता चापल्यम् एव चपलता। चित्तस्य अस्थिरता अपि चपलताया: उदाहरणम्। पंञ्चदशो व्याभिचारी भावा: हर्ष :– चितस्य प्रफुल्लता: हर्षा[12]। प्रियदर्शने, पुत्रजन्मने, धनप्राप्ति समये, हर्षा: जायन्ते[13]। हर्षस्य अनुभावा: पुलक, स्वेद,अश्रु तथा स्वर भेदादि[14]। षोडशोव्यभिचारी भावा: आवेगा: आकस्मिक रुपेण इष्टानिष्ट प्राप्तिरिह आवेगो भवति। प्रिय समाचार श्रवणेन सत्रुदर्शनेन, आवेगो

---

1 आलस्य श्रवणपदिजड्यि जृम्भासितादिमत्। दशरुपक, 4/27।

2 क्रियाविद्वेष आलस्यम्। सरस्वतीकण्ठभरणम्, पू/ १६१। श्रृङ्गारादिभिर्मनस: क्रियाविद्वेष आलस्यम्। श्रृङ्गारप्रकाश, 14/ पृ 578। अग्निपूराण, 176। 24।

3 दु:खस्या दु:खातिरेको वा दैन्यम्। रसतर०, 5/पृ 48।

4. अनुभावास्तापवैवण्यवाष्पश्वासादय:। वही।

5 तस्य विभावा भीत्यावेगानुचिन्तनादय: ।वही।

6 अनुवाद – दशरुपक, 4/पृ 289।

7. मोहचित्तस्य शून्यत्वम्। भावप्रकाशन, 1/पृ 19 तथा 31। अचैतन्य प्रहारदे: मोहोडत्राधूर्णनादय:। नाट्यदर्पण, 3/36।

8. सस्कार जन्य ज्ञान स्मृति:। रसतर०, पृ. / 5 ।

9. संस्कारजन्य ज्ञानं प्रत्यभिज्ञा रुप स्मरणरुप च /वही, पृ/159।

10. धृति: सन्तोषो दु:खोयोदु:खबुध्दिर्वा। रसतर०, 5/पृ. 5।

11 सन्तोषो ज्ञानशक्यत्यादेर्धृतिरव्यग्रभोगकृत्। दशरुपक, 4/12। धृति: सन्तोष:। टीका – काव्यानुशासन, 2/पृ 201 ।ज्ञाना देधृतिरव्यग्रभोगकृत्। काव्यानुशासन, 2/पृ 104।

12. चेत:प्रसादो हर्ष:। रसतर०, 5/पृ 53 ।

13. प्रियदर्शनपुत्रजननादयो विभावा: ।वही।

14 अनुभावा: पुलकस्वेदा श्रुस्वरभेदादय:। वही।

जायते[1]। सप्तदशोव्यभिचारीभावा: जडता सफल व्यवहारेषु इक्षम ज्ञानवता[2] जड़ता कस्मिनअपि र्ये यदा कार्यम् कर्तुम सामर्थयम् नैव भवति तन्नाम् जडता। इष्टानिष्ट दर्शनम् अस्य विभावा:। प्रियजनम् दृष्ट्वा व्यक्ति आनन्देन जड: भवति। यदा – कदा शत्रुजनम् दृष्ट्वा भयेन अपि जडता भवति। भाषणम् निर्निमेष निरीक्षणम् इष्टमनिष्टस्य अज्ञानम् एव जडता[3]। जडतायाम् व्यक्ति:वार्तालापं कर्तुम् नशक्नोति । दृष्टि: स्थिरो भवति। समुद्रं उल्लंघ्य हनुमतम् द्रष्ट्वा वानरा: हसन्ति । परंतु समुद्र तरंगा नदृष्ट्वा सर्वे मानवा: चित्र लेखिता इव अभवन एतद् अर्थम् अत्र जडताया: अनेकानि उदाहरणानि अत्र प्रदर्शितानी। अष्टादशव्यभिचारिभावा: गर्व: आत्मनि सर्वाधिकत्व बुध्धि प्रदर्शनम् अन्यत्र आधमत्व बुध्धि निदर्शनम् गर्वा:[4]। गर्वस्य विभावा: सन्ति बलम् ऐश्वर्यम् कुलीनता, लावण्य,इत्यादि[5] अधिकम् बलम् उच्चकुले जन्म, विषाद धन संपति सौंदर्यम् गर्वस्य निंदनम् करोति तेन गर्वा: जायते। शारदातनयमतानुसारेण विद्याबलादि कारणात्[6] गर्वा: जानीयात् अन्यस्य तिरस्कारणम् अस्य अनुभावा:[7]। नवदशव्यभिचारीभावा: विषाद इष्ट वस्तुनाम् अप्राप्ति इष्ट वस्तु विषये संशया: अनिष्ट तत्वस्य प्राप्तिराशेङ्का एव विषाद:[8]। विषादस्य कारणानि सन्ति अपराधा धनभावा:[9] आर्पूता धन, यश, प्रतिक्षण मृत्युभयस्य संशया:। मुखे विषादस्य अवस्थायाम् उत्तम् पुरुषस्य सहायकसेवा[10] अन्वेषणम् करोति। मध्यम् प्रकृति युक्ता: पुरुषा: खिन्नो भवन्ति अधम प्रकृति युक्ता: पुरुषा: अधम प्रकृति युक्ता पुरुषाणाम् मुखम् सुश्रुयते विषाद युक्तो भवति श्वासे गति: वर्तते[11]। भानुदत्तमिश्रेण विषादस्य सर्वथा नवीनरुपेण व्याख्या प्रदत्ता। धनञ्जय तथा विश्वनाथ मतानुसारेण प्रारब्ध कार्ये असफलता तेन अनुत्सा:[12] विषाद:[13]।

1. विवर्त न्चक्कर। संस्कृत – शब्दार्थ – कौस्तुभ, पृ 1,42।
2 वैरिदर्शनप्रिश्रवणोत्पातादयो विभाव:। वही ।
3. सकलव्यवहाराक्षमज्ञानवता जडता। रसतर०, 5/ पृ 54।
4 इष्टानिष्टदर्शनादयो विभावा:। वही।
5. अनुभावा अनवभावषणनिर्निमेष प्रेक्षणेष्टानिष्टापरिच्छेदादय:। वही।
6 आत्मनि सर्वाधिकत्व बुध्द्वि, सर्वस्मिन्नधमत्वबुधिर्वा गर्व:। रसतर०, 5/ पृ 55।
7 बलैश्वर्याभिजनलावण्यादयो विभावा:। वही।
8 गर्व विद्यावलैश्वर्यवयोरुपधनादिभि:। भावप्रकाशन, 1/पृ. 22।
9 वही।
10 इष्टसंशयोडनिष्टजिज्ञासा वा विषाद:। रसतर०, 5/पृ 55।
11. विभावा अपराधधनगमनादय:। वही।
12. संस्कृत – शब्दर्थ – कौस्तुभ, पृ. 1192।
13. अनुभावा उतमानां सहायान्वेषणोपायचिन्तादय: , मध्यमानां विमनस्कता, अधमानाभिष्टध्यानधावान मुखशोषनिद्रारवासादय:। रसतर०, 5/पृ. 56।

विषादसु संशयस्य प्रधान्यो भवति। विषादस्य अवस्थायाम् उत्तम्: उपायम् चिन्तयति मध्यमा: खिन्नभवति। अधमा: संशययुक्तो भवति। भानुदत्तमिश्र धनञ्जय तथा विश्वनाथ मतानुसारेण क्रियमाणे कार्ये, असफलता उपायानाम् अभावा: अनुत्साहा: विषादम् जनयति। भोजराजेन चितस्य ग्लानि विषाद: इति प्रोक्तम्[1] । हेमचन्द्रेन क्रिडायाम् विषादो भवति इति प्रोक्तम्[2]। विंशति:व्यभिचारिभावा: औत्सुक्य: उत्सुक्ता एव औत्सुक्यम् सकलेन्दियाणाम् एक एव क्रियारंभा उत्सुकता एव औत्सुक्यम्[3]। एकविंशति:व्यभिचारिभावा: निद्रा इतर इन्दियम् अयहाय विहाय मना: त्वचि गच्छति[4] । निद्रायाम् ज्ञानस्य अभावा: भानुदत्तमिश्रेण विविच्य विभावा: सन्ति। स्वाभाव चिन्ता आलस्यम्[5] । इत्यादि निद्राया: विभावा:। निदृया कोपा: आवेगा: भयाभयम् ग्लानि: सुखदु:खम् द्वाविंशति:व्यभिचारिभावा: अपस्मार: अपस्मारो नाम चितस्य अवस्था[6]। भूत, प्रेत, पिशाच तथा ग्रहाणाम् दु:खप्रभाव समर्थे अपस्मारो भवति[7]। अपवित्रता शून्यम् बृषम् धातो: विषमता दु:खम् भयम् आदि अस्य विभावा:[8] ।अपवित्र तथा शून्य विरस्य भूतप्रेतादि नाम शंका जायते तेन अपस्मारो भवति। शरीरे पित्त कफ धातूनाम वैषम्यम् अत्यधिक भयम् तथा दु:खम् अपस्मारस्य कारणम् भवति। भानुदत्त मिश्रेण मूर्च्छाम् अपि अपस्मारस्य अंतर्गतत्वेन प्रोक्तम्[9] । अपस्मारे मनस्यगति: अवरोधा भवति[10]। ज्ञानस्य अभावा: जायते[11]। विश्वनाथेन ग्राहादिनाम् कारणात् उत्पन्ना: आवेषा: एव विक्षेपस्य अपस्मारस्य कारणम् भवति। अपस्मारस्य अवस्थायाम् भ्रांति: विस्मृतस्य जायते। त्रयोविंशति: व्यभिचारीभावा: सुप्त: रात्रो निद्रायाम् मना: शरीरस्य त्वचाम् त्यक्त्वा निद्रायाम् प्रविशति। तदा शरीरे सुप्तत्वम् जायते[12] । सुप्तवत्वस्य विभावा: निद्रा[13]। सुप्त अवस्थायाम् नेत्रम्

---

1 सत्य – साहस। संस्कृत – शब्दार्थ – कौस्तुभ, पृ 116।

2. प्रारब्धकार्यासिध्द्यादेर्विषाद सत्व सक्षय:। दशरुपक, 4/31। उपायाभावज्मा तु विषाद: सत्व सक्षय:। साहित्यदर्पण, 3/167।

3 विषादश्चेतसो ग्लानिरुपायभावना सयो: ।। सरस्वतीकण्ठाभारण, 5/156।

4 विषादो मन:पीडा। टीका – काव्यानुशासन, 2/पृ 101। कार्यभङ्गा द्विषाद: सहायान्वेषणमुखशोषदिकृत्। काव्यानुशासन, 2/106।

5 औत्सुक्य कालासहिष्णुता सकलेन्द्रि याणामेकदैव क्रियारम्भाो वा। रसतर०, 5/पृ 56।

6 इतरदिन्दियमपहाय तनस्त्वचि यदा वर्तते तदा निद्रा रसतर०, 5/57।

7 तत्र विभावा: स्वभावचिन्ताडडलस्यक्लमादय:। वही।

8. ग्रहद्यावेशोडपस्मार:। रसतर०, 5/पृ 58।

9 भूतसञ्चादिसम्भूत:(आ) वेशोपस्मार:। अन्य पाठ , रसतर०, पृ 58/9।

10 विभावा: अपवित्र्यशून्यग्रहस्थितिधातुवैषम्योन्कटदु:खभयादय:। वही, 5/पृ 58।

11. विभावा: अपवित्र्यशून्यग्रहस्थितिधातु वैषम्योन्कद्दु:खभयादय:। वही, 5/पृ 58।

12. मूर्च्छा चात्रैवार्न्तभवति, वही 58।, वही 4/पृ 34। वही 5/पृ 54।

13. ताचमपि विहाय विदाय तन: पुरोतति वर्तते तदा सुप्तम्। रसतर०, 5/पृ. 58।5. निद्रा विभाव: वही।

र्निविलितो भवति। शरीरस्य चेष्टा अवरोध्यते। भरत, धनञ्जय आदीनाम मते निद्रा कारणात् जायमानस्य सुप्तस्य भावस्य एव सुप्तम् कथ्यते[1]। हेमचन्द्रामतानुसारेण प्रगाढनिद्रायाम् सुप्तत्वम् जायते[2]। चतुर्थविंशतिःव्यभिचारिभावाः – इन्द्रियाणाम् प्रथमः प्रकाश विबोधाः[3]। निद्रायाः समाप्त भयन्तम् विबोधस्य जन्म भवति निद्रा पश्चात यद विजृर्भणम् जायते सैव विबोधा। भोज, विश्वनाथ विद्यानाथादि आचार्य मतानुसारेण निद्रायाः निद्रा पश्चात जागरण अवस्थायाः आरंभा एव विबोधा[4]। पंञ्चविंशतिःव्यभिचारिभावाः अमर्शः– परा अहंकार प्रश्मोत्कट समीधा अमर्श अस्य विभावाः तिरस्काराः अपमानश्च[5]। अस्य अनुभावाः स्वयेद शिराः कंपनम् नेत्रस्य ललिमा इत्यादि अस्य अनुभावाः। षड्विंशतिःव्यभिचारिभावाः अवहित्थः – आकार[6], व्यवहार[7], संगोपनम्, अवहिन्य[8] लज्जा, दृष्टता, कुटिलता, अस्य विभावाः। अस्य अनुभावा[9] अन्यथा करणम् अन्यथा प्रेक्षणम् अन्यथा कथनम् भरतमुनि मते अवहित्थम् नामो आकार प्रक्षादात्मकम तच्छ्, लज्झघ भयापजय विभावैः समुत्पद्यते। तस्य अन्यथा कथन अवलोकित कथा भंगकृत अनुभावयी अभिनयाः प्रयोगत्वय। सप्तविंशतिःव्यभिचारिभावाः उग्रताः निर्दयता अर्थात दयायाः अभावाः एव उग्रता[10]। अपराध, दोष, पतन, शौर्य कार्यम् अस्य विभावाः[11]। भानुदत्त तथा रामचंद्र, गुणचंद्र शाङ्गदेव आदि आचार्याणानाम्मते दुष्टस्य अपराध कारणात् निर्दयता एव उग्रता[12]। अष्टाविंशतिः व्यभिचारिभावाः मतिः– यथार्थ ज्ञानम् मति[13]। शास्त्राणाम् अध्ययनम् मननम् अस्य विभावाः[14]। शिष्याणाम् उपदेशाः भ्रगति करचालनादयः आदि अस्य अनुभावा[15]। भानुदतमिश्रणेन विनय,अनुनय उपालम्भाः आदिनाम् अस्य अंतर्गत्वेनगणनाकृता

1 निद्रासमुत्थम्। नाट्यशास्त्र, पृ.368। विष्णुधर्मोतरपुरा, 31/32। सूप्त निप्रोम्दवम्। दशरुपक, 4/22। टीका, काव्यानुशासन, 2/ पृ. 101। भावप्रकाशन, 1/पृ.23।

2. सूप्त निद्राया गूढावस्था। टीका – काव्यानुशासन, 2/ पृ. 101।

3 इन्द्रियाणा प्रथम प्रकाशो विबोधः । रसतर०, 5/ पृ. 59।

4 निद्रापगमहेतुभ्यः प्रबोधश्चतनागमः। सरस्वतीकण्ठाभरण, 5/163।

5. श्रृङ्गारप्रकाश, 14/पृ. 58। निद्रापगमहेतुभ्यो विबोधश्चेतनागम्ः। जृम्भाङ्गभङ्गनयनमीलनाङ्गावलोककृत्॥ साहित्यदर्पण, 3/151। विबोधश्चेतनावाप्तिजूम्भाक्षिपरिमार्गकृत। प्रतापरुद्रीय, रसप्रकरण, पृ 183।

6. विभावा अवमानाडधिक्षेपादयः।वही।

7. अनुभावाः स्वेदशिरः कम्पननयाडडरुण्यादयः। वही।

8. आकारगुप्ति मन के भावों को छिपाना। संस्कृत – शब्दार्थ – कौस्तुभ, पृ. 171।

9. व्यवहार आचरण, वही पृ. 1076।

10. आकार व्यावहारसङ्गोपनमवहीत्थम्। रसतर०, 5/ पृ 61।

11. संस्कृत – शब्दार्थ – कौस्तुभ, पृ 406।

12. उग्रता – निर्दयता। रसतर०, 5/पृ. 61।

13. विभावा अपराधदेषकीर्तनचौर्यादयः। दुष्टेडपराधानैर्धृण्यम्, औग्रयं बन्धवधदिभिः। नाट्यदर्पण, 3/37। नैर्धृर्ण्य निर्दयत्वम् टीका, वही, 3/पृ. 162। तवौग्रैय निर्दयात्मकम्। सङ्गीतरत्नाकर, 7/ 1539।

14. यथार्थज्ञानं मतिः। रसतर०, 5/पृ. 62। अत्र विभावाः शास्त्रचिन्तनादयः वही।

15. अनुभावाः शिष्योपदेशभ्रूक्षेपकरचालनचातुर्लादयः। वही 5/ पृ 62।

वर्तते[1]। विद्या विनयेन शोभते[2]। विद्या ददाति विनयम्। नवविंशति:व्यभिचारिभावा: व्याधि: ज्वरादि विकाराख्यो व्याधि:[3]। शरीरे बात , पित्त कफादि वैषम्येन काम, क्रोध, कारणात व्यक्ति व्याधिग्रस्तो भवति अत्र व्याधि अस्य विभावा:[4] । कृता धूपद्रवादि अनुभावा। त्रिशंत्: व्यभिचारिभावा: उन्माद: विचारम् विना आचारा: उन्माद[5] । प्रिय वियोगे धन संपत्ति नाशो उन्मादो जायते[6]। उचित अनुचित विचारेण विना सुखम् एव उपदेश्यम् मत्वायत् कार्यम् क्रियते तस्य नाम अप्रेक्षकारिता भानुदत मिश्रेण अप्रेक्ष्य कारिताम् एव उन्मादत्वेन स्वीकृतम्[7] । उन्मादार्थे अविचारम् इति पदेन यत् ग्रहणम् क्रियते तन्नाम् उन्माद:। प्रिय वियोगा: धननाशा: आदि अस्य विभावा:। व्यर्थ भाषणम् हासम् रोदनम् उन्मादा:। भोज हेमचन्द्र शारदातनय रामचंन्द्र गुणचन्द्रादिभी:[8] आचार्यै: शोकावेगात् चितस्य विप्रलंबम् उन्मादा: इति प्रोक्तम्। एकत्रिशंत्:व्यभिचारिभावा:– मरण शरीरात् प्राणस्य बर्हिगमनम् एव मरणम् प्रोक्तम[9]। भृतौ: संकल्पा मरणम् इति रामचन्द्र, गुणचन्द्र आचार्येण प्रोक्तम। आंगिक चेष्ट्या मरणाभिनयम् मरणम् इति प्रोक्तम्[10]। आचार्य शारदातनयेन प्राणवियोगे मरणम् इति प्रोक्तम्[11]। विश्वनाथेन अपि शस्त्रधातेन शरीर त्यागा: मरणम् प्रोक्तम्[12]। अश्रूनाम् पतनम् अस्य अनुभावा[13] । प्राण त्यागा: अस्य मरण अवस्था। द्वात्रिशंत्:व्यभिचारिभावा: त्रास मनोविक्षोभा: त्रासा[14]। त्रासास स्तंभा: स्वरभेदा: रोमांच: तस्य जीवनम् शरीरस्य पतनम् अस्य अनुभावा[15]। अश्रुपातादि: अस्य अनुभाव:[16]। व्यक्ते: शरीर गौरवम् एव गात्र गौरवा। आचार्य धनञ्जयेन गर्जनया जायमाना: मनुस्यस्य क्षोभ विकारा: एव त्रासा:[17]। कंपनादि अस्य अनुभावा:[18] । रमचंन्द्र

1. नयविनयडनुनयोपदेशोपालम्भा अत्रैवान्तर्भवन्ति। रसतर०, 5/ पृ 52।
2 विद्या ददाति विनयम्।
3 ज्वरादिविकाराख्यो व्याधि:। रसतर०, 5/ पृ. 64।
4. वही अन्य–पाठ, पृ. 64/2।
5 विनाविचारभाचार उन्माद:। रसतर०, 5/पृ.64।
6 अप्रेक्ष्यकारिता उन्माद इति यस्य मत, तत्रेदं दुषणम्। वही।
7 प्राणनिष्क्रमण निधतम्। वही 5/ पृ 79।
8. ब्याध्यादेर्मुत्युसङ्कल्य मरण विकलेन्द्रियम्। नाट्यदर्पण, 3/35।
9. मरण प्रकृतिप्राणवियोग इति कथ्यते। भावप्रकाशन, 2/पृ 31।
10. शराद्यैर्भरण जीवत्यागोडङ्गपतनादिकृत्। साहित्यदर्पण, 3/35।
11 वही
12. अनुभावा: स्तम्भस्वरभेदरोमाञ्च स्त्रस्तगात्रतादय:। वही।
13. अुश्रुपातादय: वही।
14. गात्रगोखादय:। अन्य – पाठ , रसतर०, 12/पृ 80।
15. गर्जितादेर्मन: क्षोभसत्रासोडत्रोत्कम्पितादय:। दशरुपक, 4/16।
16. वही।
17 धोराच्चकित (ता) त्रास:। नाट्यदर्पण, 3/4।
18. विचारो वितर्क:। रसतर०, 5/पृ 67।

गुणचंन्द्राचार्येण भिषण शब्देन त्रास कारणात्[1]। भिषण शब्देन उत्पन्नम् भयम् एव त्रासा:। त्रयोत्रिशंत्:व्यभिचारिभावा: वितर्क: विचारो वितर्का:[2] । एकस्मिन विषये परस्पर विरोधीमत एव विर्तका:। शब्दस्य नित्यत्वम् अनित्यत्वम् उभयो: प्रतिस्थापनम् तर्क: आचार्य भानुदतमते वितर्को अपि चर्तुर्विद्या विचारात्मा संशयात्मा अनध्वयसरप आत्मा तथा विप्रति प्रत्यात्मा धनञ्जय तथा आचार्य विश्वनाथ मतेन संदेह कारणात् उत्पन्नो विचारा: एव वितर्का:[3]। भानुदतमिश्रेण वितर्कस्य विभावानाम् विवेचनम् शार्ङ्गदेव सदसम् एव कृतम् एवम् निर्वेदादि त्रया: त्रयोत्रिशंत्: व्याभिचारि भावा: भवति[4]।

1 वितर्कश्चतुर्विधः विचारात्मा सशयात्मादन ध्यवसायात्न। विप्रतिपत्यात्मा चेति। रसतर०, 5/पृ. 67।
2 वही।
3 पत्र विप्रतिपति: स्यात्सशयोडपि विमर्शनम्।
4 पक्षयोरुभयोरुन्त माने साधकबाधके॥ सङ्गीतरत्नाकर, 7/1588।

अथ ' रसभावाभिनया ' इत्यतो वृत्तिलक्षणात् प्रथमं रसमाचष्टे

(सूत्र 163) [1]स्थायी भाव· श्रितोत्कर्षो विभाव – व्यभिचारिभि· ।
स्पष्टानुभावनिश्चेय· सुख – दु·खात्मको रसः ॥ (7) 106 ॥

प्रतिक्षणमुदय –व्ययधर्मकेषु बहुष्वपि व्यभिचारिष्वनुयायितयावश्यं तिष्ठतीति स्थायी। यद्भाव एव भावात् अभावे वाभावात् रत्यादिर्व्यभिचारिणं ग्लान्यादिकं प्रत्यवश्यं स्थायी। उपचयं प्राप्य रसरुपेण रत्यादिर्भवतीति भाव । विभावै – र्ललनोद्यनादिभिरालम्बनोद्दपनरुपै – र्बाह्यै र्हेतुभि. सत एवविभावाद्, व्यभिचारिभिर्ग्लान्यादिभि रसिकमन –शरिरवर्तिभि परिपोषणाच्च श्रितोत्कर्ष, स्वीकृतसाक्षात्कारित्वानुभूयमानवस्थो, यथासम्भवं सुख – दुःखस्वभावो रस्यते आस्वाद्याते इति रस. ।

तत्रेष्टविभावादिग्रथितस्वरुपसम्पत्तय· श्रृगार – हास्य – वीर – अद्‌भुत – शान्त· – सुखात्मान· । अपरे पुनरनिष्टविभावाद्युपनीतात्मानः करुण – रौद्र – बीभत्स – भयानकाश्चत्वारो दु खात्मान· ।

यत् पुन· सर्वरसानां सुख – दुःखत्मकत्वमुच्चते तत् प्रतीतिबाधितम्। आस्तां नाम मुख्यविभावोपचिता·, काव्याभिनयोपनीतविभावोपचितोऽपि भयानको बीभत्स करुणो रौद्रो वा रसास्वाद वतामनाख्येयां कामपि क्लेशदशामुपनयति। अतएव भयानकादिभिरुद्विजते समाज. । न नाम शुखास्वादाद्वेगो धटते।

यत् पुनरेभिरपि चमत्कारो दृश्यते स रसास्वादविरामे सति यथावस्थितवस्तुप्रर्दकेन कवि – नटशक्तिकौशलेन। विस्मयन्ते हि शिरश्छेद्‌कारिणापि प्रहारकुशलेन वैराणा शौण्डीमानिन. । अनेनैव च सर्वाङ्गाह्लादकेन कविनटशक्तिजन्मना चमत्कारेण विप्रलब्धा परमानन्दरुपतां दुःखत्मकेष्वपि करुणादिषु सुमीधस· प्रतिजानते। एतदास्वादेन प्रक्षेकाः अपि एतेषु प्रवर्तन्ते। कवयस्तु सुख – दु·खात्मकसंसारानुरुप्येण रामादिचरितं निबध्नन्त. सुख –

1. हिन्दीनाट्यदर्पण सूत्र - 163 श्लोक क्रमाक (7) 106

दु·खात्मकरसानुविध्द्वमेव ग्रथ्नन्ति स्वदन्ते इति। अपि च सीताया हरणं, द्रौपद्या. नचाम्बराकर्षणं, हरिशचन्द्रस्य चाण्डालदास्यं, रोहिताश्वस्य मरणं, लक्ष्मणस्य शक्तिभेदनं, मालत्या व्यपादनारम्भणमित्याद्यभियमानं पश्यतां सहृदयानां को नाम सुखास्वाद ?

तथानुकार्यगताश्च करुणादयः परिदेवितानुकार्यत्वात् तावद् दु खत्माका एव। चानुकरणे सुखात्मनः स्युर्न सम्यगनुकरणं स्यात्। विपरीतत्वेन भासनादिति।

योऽपीष्टादिविनाशदुःखवतां करुणे वर्ण्यमानेऽभिनीयमाने वा सुखास्वादः सोऽपि परमार्थतो दु खास्वाद एव। दु खी हि दु·खितवार्तया सुखमभिमन्यते। प्रमोदवार्तया तु ताम्यतीति करुणादयो दु·खत्मान एवेति।

विप्रलम्भश्रृङ्गरस्तु दाहादिकार्यत्वाद् दु·खरुपोऽपि सम्भोगसम्भावनागर्भत्वात् सुखात्मक·।
रसश्च सुख्यलोकगत प्रक्षनगत काव्यस्य श्रोतृ – अनुसन्धायकद्वयगतो वेति। . स्पष्टा· . इति स्पष्टा· सम्यङ् निर्णाता । असन्दिग्धं हि लिङ्गभवति। अनुभावयन्ति परस्थानपि रसानवेबोधयन्तीति अनुभावा·। स्तम्भ – स्वेद – अश्रु – रोमाञ्च – भ्रूक्षेप – आदय.। तैर्यथासम्भवं सत्तया निश्चेय।

इह तावत् सर्वलोकप्रसिध्ध। परस्थस्य रसस्य प्रतिपत्ति.। सा च न प्रत्यक्षा चेतोधर्माणामतीन्द्रियत्वात्। तस्मात् परोक्षैव। परोक्षा च प्रतिपत्तिरविनाभूताद् वस्त्वन्तशत्। अत्र च रसेऽन्यस्य वस्त्वन्तरस्यासम्भवात् कार्यमेवाविनाकृतम्।

परगताविभावाद्यनुक्रियायां च पररञ्जनार्थं प्रवृतस्य नटस्य रसाभावेऽपि स्तम्भस्वेदादयो भवन्तङ्कनशयम्। तेषां परगतरसजनकत्वेनाकार्यत्वात्। नटगता हि स्तम्भादयः प्रक्षकगतरसनांकारणम्। प्रक्षकगतास्तु कार्याणि।

परोक्षं चार्थं बुभुत्सुना परोक्षार्थ – नान्तरीफके लिङ्गस्वरुपे निपुणेन प्रतिपत्त्रा भाव्यम्।
नटोऽपि च रसं गमयन्त्येव यदा रसकार्या भवन्ति। न च नटस्य रसो न भवतीत्येकान्त.।

पण्यस्त्रियोहि च धनलोभेन पररत्यर्थं रतादि विपञ्चयन्त्य· कदाचित् स्वयमपि परां रतिमनुभवन्ति। गायनश्च पर रञ्जयन्त· कदाचित् स्वयमपि रज्यन्ते। एवं नटोडपि रामादिगतं विप्रम्भाद्यनुकुर्वाण स्वयमपि तत्मयीभावमुपयत्येवेति तद्कत। अपि रोंताञ्चदयस्तत्र रसं गमयेयुरेव। अत एव ' स्पष्टानुभाव ' इत्युक्तम्।

रोमाञ्चादयश्च ये स्त्री – पुंस – नट – काव्यस्थास्ते परेषां रसजनकत्वाद् विभावमध्यवर्तिन । प्रेक्षक – श्रोतृ – अनुसन्धात्रादिस्थितास्तु रसस्य कार्याणिसन्तो व्यवस्थापका· ।

यत्र विभावाः परमार्थेन सन्त· प्रतिनियतविषयमेव स्थायिन रसत्वमापादयन्ति, तत्र नियतविषयोल्लेखी रसास्वादप्रत्यय·। युवा हि रागवतीं युवतिमवलम्ब्य तद्विषयामेव रतिं श्रृङ्गारतास्वादयति।

यत्र तु परानुरक्तां, वनितामवलम्ब्य सामान्यविषया रतिरुपचयमुयैति, तत्र न नियतविषय· श्रृङ्गाररसास्वाद·। विभावानां सामान्यविषये स्थाप्यविर्भावकत्वात्। बन्धुशोकार्तारुदती स्त्रियमवलोक्य सामान्यविषय एव करुणरसास्वाद·। एवमन्योष्वपि रसेषु विषय – सामान्य – विषयत्वं द्रष्टव्यम् ।

ये पुनरपरमार्थसन्तोडपि काव्याभिनयाभ्यां सन्त इवोपनी ता विभावास्ते श्रोतृअनुसन्धातृ – प्रक्षकाणां सामान्यविषयमेव स्थायिनं रसत्वमापादयन्ति। अत्र च विषयविभावानपेक्षी रसास्वादप्रत्यय·। न हि रामस्य सीतायां श्रृङ्गारेडनुक्रियमाणे सामाजिकस्य सीताविषय· श्रृङ्गारः समुल्लसति। अपि तु सामान्यस्त्रीविषय.। नियतविषयस्मरणाशदना स्थायिन प्रतिनियतविषयतायां तु प्रतिनियतविषय एव रसास्वाद ।

तथा अपरमार्थसतां,[1] अभिनय – काव्यार्पितानां च विभावानां बहुसाधारणत्वाद् य एकस्य रसस्वादः सोडन्याप्रतिक्षपात्मा, इत्ययोगव्यवच्छेदेन न् पुनरन्ययोगव्यवच्छेदेन।

1. परमार्थसतां ।

एवं च लोके काव्ये वा सर्वरसिकसाधारणो रसास्वाद न पुन सर्वदथाप्याधारानुल्लेखी। आधारोल्लेखनिरपेक्षायाश्चित्तवृते कस्याश्चिदनुपलक्षणात्। चित्तवृत्तिविशेषश्च् रस·।

अत्र च रत्यादेर्विभावैराविर्भूतस्य पोषकारिणो स्वयादिभि·, काव्यनाट्यगतैवां अन्यश्य रत्यादयो रसान्मुखत्वेन्मील्यन्ते, तदा पथायोगं व्यभिचारिणोपि तत्र प्रादु षन्ति। न हि स्त्र्यादिचिन्तां श्रृङ्गारो, हास्यो, विषादं करुणाो, अमर्ष रौद्रो, हर्ष वीर, त्रासं भयानक·, शंकां बीभत्स, औत्सुक्यमद्भुतो, निर्वेदं शान्त सहचारिणं बिना प्रादुर्भवति।

अन्यगतचेसो विरक्तचेतसो वा, वाक्यर्थविबोधे वनितादिदर्शनेडपि वा चिन्ताद्यभावे रसाभावात्। सौक्ष्म्यादाशुभावाच्च क्वचिदनुपलक्षणेडपि न दोष·। प्रादुर्भूताश्च व्यभिचारिणो रसान्मुखं स्थायिनं पोषयन्तो रसत्वमापादयन्ति। अत एव रसत्वोन्मुखानां स्थायिनां व्यभिचारिणः सहचारिणो, विभावास्तु प्राग्भाविन·।

ये पुन. स्त्र्यादिगता. काव्याभिनयोपदर्शिताश्च व्यभिचारिणोऽनुभावा वा ते परस्मिन् रसोन्मुखत्वेन स्थायिनमुन्मीलयन्ति। ते विभावा एव जनकत्वात्। व्यभिचारि – अनुभावव्यपदेश· पुनरेतेषां स्त्र्याद्यपेक्षया, वर्णनीयानुकार्यपेक्षया च।

यदप्युच्यते – “ विभावानुभावव्यभिचारिसंयोगद् रसनिष्पति· ” इति तत्राप्यनुभावा व्यभिचारिणश्च स्त्र्यादिवर्णनीयानुकार्ययेक्षयैव द्रष्टव्या·।

तदेवं स्व – परयो. प्रत्यक्ष – परोक्षाभ्यां गम सुख – दुःखत्मा (1) लोकस्य (2) नटस्य (3 – 4) काव्य –श्रोतृ – अनुसन्धात्रोः (5) प्रक्षकस्य च रसः। केवलं मुख्यस्त्री – पुंसयो स्पष्टेनैव रुपेण रसो, विभावानां परमार्थसत्त्वात्। अत् एव व्यभिचारिणोडनुभावाश्च रसजन्या· तत्र स्पष्टरुपा । अन्यत्र तु प्रक्षकादौ ध्यामलेनैव रुपेण। विभावानामपरमार्असतामेव काव्यादिना दर्शनात्। अत् एव व्यभिचारिणोडनुभावाश्च रसानुसारेणास्पष्टा एव। अत् एव प्रक्षकादिगतो रसो लोकोत्तर इत्युच्यते। काव्यस्य च रसाविर्भावकविभाववत्त्वात् सरसत्वम्। न पुन· काव्यमेव

रस , काव्ये आधारे वा रस । श्रितोत्कर्षो हि चेतोवृत्तिरुप स्थायी भावो रस । स चाचेतनस्य काव्यस्यात्म। आधेयो वा कथं स्यात् ? तत काव्यार्थ – प्रतिपत्तेरनन्तरं प्रतिपतृणां रसाविर्भाव।

प्रतिपतारश्चत्मस्थं सुखमिव रसमास्वादयन्ति। न पुनर्बहि.स्थं रसं मोदकमिव प्रतियन्ति अन्यो हि मोदकस्यास्वादोडन्यश्च प्रत्ययो रसस्य। न हि बहिस्थस्य रसस्य प्रत्ययमात्रेण रसास्वादश्चर्वणात्मक
संगच्छ्ते। भयानक – करुणाविभावाद्धि काव्यार्थत् प्रतिपत्तुश्चेतोधर्मतया स्थितौ भय – शोकौ भयानक – करुणतया परिणमत.। यदि च प्रतिपत्तु. स्थायी एव न रसतया भवति तदा बहि स्थस्य रसस्य प्रत्ययोडपि न प्राप्नोति। काव्ये नटडन्यत्र वा रसस्यासत्त्वात्। असतश्चापि प्रत्यये अहृदयस्यापि प्रतीति स्यात्। ततो विभावप्रतिपादककाव्य –प्रतिपत्तेरनन्तरं प्रतिपत्तुरेव स्थायी रसो भवति। तद्धेतुत्वाच्च काव्यं रसवदिति॥ (7) 106॥

(सूत्र 164) – [1]कार्य – हेतु सहचरी स्थाय्यीदे· काव्यवर्त्मनि।
अनुभावो विभावश्च व्यभिचारी च कीर्त्यतो ॥ (8) 110॥

सथायिनां अदिशब्द रसभावानां च यथासम्भवं ये लोकसिद्धा कार्य – हेतुसहचारिणः, ते काव्यवर्त्मनि अभिनेयान भिनेयदभिन्ने यथासंख्यं कदाचिल्लोकेडप्येवं व्यवहियन्ते। तत्र अनु लिंगनिञ्चयात् पश्चयाद् भावयन्ति गमयन्ति लिङ्गिनं रसमित्यनुभावा., स्तम्भादय । वासनात्मतया स्थितं स्थायिनं रसत्वेन भवन्तं विभावयन्ति आविर्भावना विशेषण प्रयोजयन्ति इति आलम्बन – उद्दीपनरुपा ललनाद्यानादयो विभावा·। रसोन्मुखं स्थायिनं प्रति विशिष्टेनाभिमुख्येन चरन्ति वर्तन्ते इति व्यभिचारिण । आभिमुख्यं च पोषकत्वम् यदा व्यभिचारन्ति स्थायिनि सत्यपि केडपि कदापि न भवन्तीति व्यभिचारिणः,स्वविभावव्याभिचारिण· भावे भावात्, अभावेडभावाच्च। रसायनमुपयुक्तवतो हि ग्लानि – ओलस्य – श्रमप्रभृतयो न भवन्त्येव। तत्र स्थायिनो रत्यादय· संवितादात्मकत्वादजडा एव। धैर्यादीनां स्वेदादीनां चानुभावानां वनितादीनां पर्वतादर्दिा च विभावानां, निर्वेदादीनां व्याध्यादीनां च व्यभिचारिणां यथासंख्यं संविन्मयत्व – शरीरधर्मत्वादिना जडाजडात्मकत्वम्।

1. हिन्दीनाट्यदर्पण सूत्र - 164 श्लोक क्रमाक (8) 110

एते चानुभावादय. स्थायिनं प्रति कार्य – कारण – सहचारिरुपत्वादेवा प्रधानम्। स्थायी तु प्रकर्षप्राप्त्या एषां प्रच्छ्दकत्वात् प्रधानम्। तथा व्याघ्रादेर्विभावस्य क्रोधभयाविर्भावकत्वात् श्रम – चिन्तोदेश्च व्यभिचारिणो भयोत्साहादिपोषकत्वात्, स्तम्भ – वेपथु – स्वेदादेश्चनुभावस्य श्रृङ्गार – भयानकदिजात्वात् क्वचिदपि न पार्थक्ये नियम । सामग्रीपतितस्य तु नियम इति सामग्री एवैषाभाविभांविका पोषिका ज्ञापिका चेति ।। (8) 110 ।।

(सूत्र 165) – [1] श्रृङ्गार – हास्य – कारुणा. रौद्र – वीर – भयानका ।
बीभत्साद्‌भुत – शान्ताश्च रसा·सम्दिर्नव स्मृता· ।। (9) 111 ।।

तत्र कामास्य सर्वजातिसुलभतया अत्यन्तपरिचिततया च सर्वान् प्रति हृधेतेति पूर्व श्रृङ्गार । तत श्रृङ्गारानुगामित्वाद् हास्य· । तत. हास्यविरोधित्वात् कारुण· । कामस्य चार्थजत्वात् ततोऽर्थप्रधानो रौद्र· । कामार्थयोश्च धर्मजन्यत्वात् ततो धर्मप्रधानो वीर । अस्य च भीताभयप्रदानसारत्वात् ततो भयानक । भीतस्य च सात्त्विकैर्जुगुप्सनीयत्वात् ततो बीभत्स· । बीभत्सस्य च विस्मयेनापनीयमानत्वात् ततोऽद्भतः । धर्मस्य च शममूलत्वात् तदन्ते शम. । इति । एते श्रृङ्गारादयो नवैव रसा रञ्जनाविशेषेण पुरुषर्थोपयोगधिक्येन च सद्भिः । पूर्वचार्यैरुपदिष्टा । सम्भवन्ति त्वपरेऽपि । यथा – गर्द्धस्थायश लौल्यः । आर्द्रतास्थाथी स्नेह. । आसक्तिस्थायि व्यसनम् । अरतिसथापि दु खम् । सन्तोषस्थापि सुखा्मत्यादि । केचिदेषां पूर्वेष्वन्तर्भावमाहुरिति ।

(सूत्र 166) – [2]सम्भोग – विप्रलम्भात्मा श्रृङ्गार· प्रथमो बहु. ।
मान – प्रवास – शापेच्छ्रा – विरहै पञ्चधाऽपर· ।। (10) 112 ।।

विलासिनोरन्योन्यानुकूलवतिनो. प्रमपरयोर्यद् दर्शनस्पर्शनादि·, ससम्भोगः । परस्परानुरक्तयोरपि विलासिनो· पारतन्त्र्यदेरधटनं चित्तविश्लेषो वा विप्रलम्भ । एतौ द्वावप्यवस्थाविशेषो आत्मा स्वभावो यस्य अवस्थातु – र्दशद्वयानुयायिन, आस्थाबन्धात्मकरतिप्रकर्षरुपश्य श्रंगारस्य । तेन श्रृंगारस्य नेमौ भेदौ गोत्वस्यव शावलेयबाहुलेयौ,

1. हिन्दीनाट्यदर्पण सूत्र - 165 श्लोक क्रमांक (9) 111
2 हिन्दीनाट्यदर्पण सूत्र - 166 श्लोक क्रमाक (10) 112

अपितु सम्भोगेऽपि विप्रलम्भसम्भांवनासद्भावात्, विप्रलम्भेऽपि मनसा सम्भोगेनुवेधाद् उभयसंवलितस्वभाव· श्रृंगार· । उत्कटवाच्चैकदेशेऽपि सम्भोगश्रृंगारो विप्रलम्भश्रृंगार इति चोपचारेणोच्यते। अवस्थाद्वयमीलननिबन्धने च सातिशयश्चमत्कार । यथा —

" एकस्मिन् शयने पराङ् मुखतया वीतोत्तरं ताम्यातो –
रन्योन्यं हृदयस्थितेऽप्यनुनये संरक्षतोर्गौरवम्।
दम्पत्यो शनकैरपोगवलनामिश्रीभवच्चक्षुषो—
र्मग्नो मानकलि· सहारभसव्यावृत्तकण्ठग्रअम्।।"

अत्र ईर्ष्याविप्रलम्भ· – सम्भोगयोर्विर्भावदिकृता सातिशया चमत्कृति· । प्रथम· सम्भोगाख्यो बहुः। परस्परावलोकन – चुम्बन – विचित्रवक्रोक्त्यादिभेदतोऽनन्तप्रकारः।

" किमपि किमपि मन्दं मन्दमासत्तियोगा –
दविरलितकपोलं जल्पतोरक्रमेण।
अशिथिलपरिरम्भव्यापृतैकैकदोष्णो –
रविदितगतयामा रत्रिरेव व्यरंसीत्।।"

अपरो विप्रलम्भ· । ईर्ष्या – प्रणयभंगाभ्यां वैमनस्यं मानः। यथा —

"याते द्वारवतीं तदा मधुरियौ तदत्तम्कम्पानतां,
कालिन्दीतटरुढवंजुललतामालिंग्य सोत्कण्ठया ।
तद् गीतं गुरुवाष्पगद्गदगलत्तारस्वरं राधाया,
येनान्तर्जलचारि भिर्जलचरैराप्युत्कूजितम् ।। "

सन्निहितदेशस्थापि रुपान्तरापादनं शाप· । यथा कादम्बर्या महाश्वेतया वंशम्पायनस्य शुकरुपपादनम्।

मातापितत्रादिपारतंत्र्याद् भाविनवसंगमयो· संगमाभिलाष इच्छा, । यथा —

" उद्धच्छो पियइ जलं जह – जह विरलंगुली चिरं पहिउयो ।
पावालियावि तह – तह धारं तणुउपं पि तणुएइ ॥
[ ऊर्ध्वाक्ष · पिबति जलं यथा यथा विरलागुलिश्चिरं पथिकः ।
प्रपापालिकापि तथा तथा धारां तनुकामपि तनयति ॥ "
इति संस्कृतम् । ]

यथा वास्माकं सुधाकलरो —

" इत्यारु संचरंत नियच्छिड्डं पाडिवेसियजुयाणं ।
कम्मयरीकम्मं पि हु धवावइधूइपा सयं कुणइ ॥
[ रथ्यायां संचरन्तं दृष्टवा प्रतिवेश्मिकयुवानम् ।
कर्मकरीकर्मापि खलु धनपतिदुहिता खयं कुरुते ॥ "
इति संस्कृतम् । ]

सम्भूतभोगयोर्माताद्यभावेऽपि कार्यान्तरव्यापृतलय । अननुसर्पणं विरहः । यथा —

" अन्यत्र व्रजतीति का खलु कथा नाप्यस्य तादृक् सुहृत् ।
यो मां नच्छ्रति नागतश्च ह हा कोऽयं विद्ये· ।

इत्यल्पेतरकल्पना – कावलितस्वान्ता निशान्तान्तरे,
बाला वृत्तविवर्तनव्यतिकरा नाप्नोति निद्रां निशि ॥ "
इति ॥ (10) 112 ॥

अथोमयात्मनोऽपि श्रृंगारस्य विभावानुभावौ प्रतिपादयति —

(सूत्र 167) – [1]स्त्री – पुं स – काव्य – गीतर्तु – माल्य – वेषेष्ट – कोलिजः।
अभिनेय स चोत्साह – चाटु – तापाश्रु – मन्युभि ॥ (11) 113 ॥

इह श्रृङ्गरे स्त्री – पुं सौ परस्परं मुख्यविभावौ। त्रयोश्चोत्त – मप्रकृतिकयोरुपयोगी काव्यादि·। काव्यं च सरसमभिनेयानभिनेय भेदभिन्नम्। गीतेन वाद्यनृत्ताद्यपि गृह्यते। ऋतवो वसन्ताद्याः। माल्यन्नविलेपन – ताम्बूल – विशिष्टभवानादि लक्ष्यते। वेषोविशिष्टवस्त्राभरणादि नेपथ्यम्। इष्टो विदूषक – चक्रवाक – हंसालेख्यादि·। यद्धा नयन – वदन – प्रसाद – स्मित – मनोज्ञांगविकार – वक्रो – क्त्यादयो ग्लान्यालस्य – श्रमादयश्चष्टाः। एवंविद्या हि विकारो· परस्परं स्त्री – पुंसयोरिष्टा भवन्ति। केलय· पुष्पावचय – उपवनश्रमन – जलक्रीडादय – श्चेष्टाविशेषा.। एवमन्येऽप्युपलक्षणादेवंविद्या विभावा द्रष्टव्याः। एभ्यो यथापोगमुभयात्मापि जायते रतिस्थायी श्रृगार ।

स च श्रृंगारो लब्धसत्ताक सन्नभिनेयो वाचिक – सात्त्विक – आंगिक – आहार्या – भिनयैर्नयेन सामाजिकानां साक्षाच्चर्वणागोचर उत्साहादिभि कर्तव्य ।

उत्साहो नयन – वदनप्रसादकारी चित्तोल्लास.। अयं च स्थाप्यापि वीरस्य अत्रागन्तुकत्वाद् अनुभाव·। एवं रसान्तरं प्रति व्यभिचारित्वमपि स्थायिनां सहचारितया भवत्येव। अस्य च स्थाय्यनुभावाभिनय – द्वारेणात्राभिनयहेतुत्वम्। एवं रत्यादावपि वाच्यम्। तापोऽभिमताप्राप्तेः काय – मन· – पीडा। मन्युरीर्ष्याप्रणयभंगाभ्यां चित्तोद्वगः। उत्साह – चाटुभ्यां नयनचातुर्थ – भ्रूक्षेप – परस्यागविकारादि सम्भोगश्रृंगारस्यानुभाव. सूचित·। ताप – अश्रु – मन्युभि पुन. पुन परिदेवनादिर्विप्रलम्भश्रृंगारस्यनुभावो लक्षित·। तत्र स्भोगे सुखमय। धृत्यादयो व्यभिचारिण । विप्रलम्भे त्वालस्यौग्र्य – जुगुप्सावर्जा निर्वेदादयो दु.खप्राया इति ॥ (11) 113 ॥ अथ हास्य –

(सूत्र 168) – [2]विकृताचार – जल्यांगाकल्पविस्मापनोम्दव·।
हास्योऽस्याभिनयो नासास्पन्दाश्रुजठरग्रहै ॥ (12) 114 ॥

---
1. हिन्दीनाट्यदर्पण सूत्र - 167 श्लोक क्रमांक (11) 113
2 हिन्दीनाट्यदर्पण सूत्र - 168 श्लोक क्रमांक (12) 114

विकृत प्रकृति – देश – काल – वयोऽवस्थादिविपरीत । अंगस्य च विकृत्तत्वं विरुपो व्यापार खञ्ज – कुण्टत्वादि वा। उपलक्षणाच्च धाष्टर्य – लौल्यादीनामनुचितानां मर्मोद्धाटन – अन्यहंसनावलोकनादेश्च ग्रह । विस्मापनं कक्षानासावादन – ग्रीव – कर्ण – युडा – भ्रूनर्तन – परभाषाद्यनुकरणादिकं च विटचेष्टितम्। एभ्य स्वपरस्थेभ्यो अश्रुणा चाकुञ्चन – प्रसारणादयो नेत्रविकाराः, जठरग्रहेणं पार्श्वग्रह – करताडन – मुखरागादय संग्रहयन्ते। व्यभिचारिणश्चस्य अवहित्था – हर्षोत्साह – विस्मयादय इति॥ (12)114 ॥

अथास्य भेदानुपदिशति —

(सूत्र 169) – [1]विहासश्चोपहासश्च मध्ये ज्येष्ठे स्मितं हस ।
अपहासोऽपिहासश्च नीचे प्रायोऽधमे रस ॥ (13) 115॥

तत्र हसनं मधुरस्वरम्। सास्यरागा – समयप्राप्तं च विहसितम्। सांसशिर कम्पमुहसितम्। एतौ भेदौ मध्यमप्रकृतौ। अलक्षितद्विजं स्मितम्। किञ्चिल्लक्ष्यदन्तं हसितम्। इमौ भेदौ उत्तमप्रकृतौ। अनवसर प्राप्तं साश्रुनेत्रमुत्कम्पितांस – शिरश्चापहसितम्। करोपगूढपार्श्व विक्रुष्टस्वरमुद्धतं चातिहसितम्। अभू भेदोवधमप्रकृतौ। एवं षडते हास्यभेदा। अयं च हास्यो रस प्रायो। बाहुल्येनाधमप्रकृतौ पामरप्राये भवति। स्ववर्गापेक्षया च स्त्रिया प्राधान्येऽपि पुरुषापेक्षयाधमतैवेति तस्यामपि। एवं करुण भयानकसर्व प्रकर्षेण हसति, शोचति, बिभेति, परनिन्दामाद्रियते, स्वल्पेनापि सुभाषितेन सर्वत्र विस्मयते इति ॥ (13) 115॥

अथ करुण :—

(सूत्र 170) – [2] मृत्यु – बन्ध – धनभ्रंश – शाप – व्यसन – सम्भव ।
करुणोऽभिनयस्तस्य वाष्य – वैवर्ण्य – निन्दनै. ॥ (14) 116॥

शापोऽभिमतभिमतवियोगहेतुंर्दिव्यप्रभभाववतः आक्रोश. । व्यसनमनर्थ । अनेन

1. हिन्दीनाट्यदर्पण सूत्र - 169 श्लोक क्रमांक (13) 115
2 हिन्दीनाट्यदर्पण सूत्र - 170 श्लोक क्रमाक (14) 116

देशोच्चादेर्जातं विप्लवजातं संगृहयते। एभ्यो विभावेभ्य·। शोकस्थायी करुणो रस सम्भवति। वाष्प – वैवर्ण्याभ्यां नि श्वास – मुखशोष – स्मृतिलोप – स्त्रस्तगात्रतादयोऽनुभावा सूचिता। निन्दनमात्मनो दैवस्यान्यस्य चोपालम्भ। अनेन रुदित – प्रयपिता – उरस्ताडनादि गृह्यते। व्यभिचारिणस्तस्य निर्वेद – ग्लानि – चिन्ता – औत्सुक्य – मोह – श्रम – भय – विषाद – दैन्य – व्याधि – जदता – उन्माद – अपस्मार – आलस्य – मरण – स्तम्भ – वेपथु – वैवर्ण्य – अश्रु – स्वरभेदादय इति॥ (14) 116॥

अथ रौद्र –

(सूत्र 171) – [1]प्रहारासत्य – मात्सर्य – द्रौहाधर्षापनीतिज।
रौद्र स चाभिनेतव्यो धातदन्तौष्ठपीटनै॥ (15) 117॥

परमविदायरयतो विदारथतश्च शस्त्रादिव्यापारणं प्रहार। अनेन गृहभृत्याद्युपमर्दनस्य ग्रह·। असत्येन बध – बन्धधिभिधाय – कवाक्पारुष्यस्य ग्रह। गुष्वसूया मात्सर्यम्। द्रोहो जिधांसा। दारदिरवलीकार – विद्या – कर्म – देश – जात्यादिनिन्दा – शज्सर्वस्वापहारणादिराधर्ष:। अन्यायोऽपनीति। अनेनौद्धत्यं सूचितम्। एतेभ्यो विभावेभ्य· क्रोधस्थायी रौद्र रसो जायते। दन्तौष्ठपीडनेन गण्डौष्ठस्फुरण – हस्ताग्रनिष्येषाद्यनुभावावृन्दं सूच्यते। व्यभिचारिणश्चस्य मोह – ऋत्साह – आवेग – अमर्ष – चापल – औग्य – स्वेद – वपथु – रोमाग्चादय इति। स्थायिनोऽपि चोत्साहादयो रसान्तरं प्रति व्याभिचारितां स्वीकुर्वन्ति। स्तम्भस्वेदादयश्च न रसकार्या व्याभिचारिण, किन्तु स्थायिकार्या इति॥ (15) 117॥

अथ वीर· –

(सूत्र 172) – [2]पराक्रम – बल – न्याय – यशस्तत्त्वविनिश्चयै।
वीरोऽभिनयनं तस्य धैर्य – रोमाञ्चट – दानत॥(16) 118॥

1. हिन्दीनाट्यदर्पण सूत्र - 171 श्लोक क्रमांक (15) 117
2 हिन्दीनाट्यदर्पण सूत्र - 172 श्लोक क्रमांक (16) 118

पराक्रम परकीयमण्डलायाक्रमणसामथ्यम्। बलं हस्त्यश्व – रथ – पदाति – धन – धान्य – मन्त्र्यादिसम्पत्। शारीरिकी शक्तिर्वा। न्याय सामादीनां सम्यक् प्रयोग·। अनेनेन्द्रियजयोगृह्यते। यश· सार्वत्रिकी शौर्यदिगुणख्यातिः। अनेन शत्रुविषये सन्तापकर्तृत्वप्रसिध्दिरुप । प्रतापो गृह्यते। तत्वं याथात्म्यं तस्य विनिश्चय । एव मादिभिर्विभावैरुत्साहस्थायी वीररस सम्भवति। स चानेकधा, युद्ध– धर्म – दान – गुण – प्रतापावर्जन – आद्यु प्राधिभेदात्। धैर्य महत्यपि परसैन्ये विपदि वा अकातर्यम्। अनेन सैन्योत्तजन – पराक्षेपादेरनुभावस्य ग्रह·। दानेन प्रमोद – माध्यस्थ्य – शान्तचेष्टादे·। व्यभिचारणश्चास्य धृति – मति – गर्व – आवेग – औग्रय – अमर्ष – स्मृति – रोमाग्चदय·। वीररसे च युद्धदिभावेडपि न रौद्रत्वम्, उत्साह – न्यायप्रधानत्वात्। रौद्रे तु मोह – अहङ्कार – अपन्यायप्रधान्यमिन्यनयो र्न साङ्कर्यमिति॥ (16) 118 ॥

अथ भयनक. –

(सूत्र 173)– [1]पताका – कीर्ति – रौद्रआजि – शुन्य – तस्कर – दोषज ।
भयानकोडभिनेतव्य स्तम्भ– रोमाञ्च – कम्पनै ॥ (17) 119 ॥

रौद्रा स्वराकारवैकृत्येन भीषणा पिशाचोलूकादय । आजि शस्त्राधात·। अयं चोपलक्षणं वध – बन्धयो.। शून्यं निर्जनं गेहारव्यादि। दोषो गुरुनृपादेरपराध । एभ्यो, दृष्ट – श्रुतेभ्यश्चि – न्त्यमानेभ्यो वा विभावेभ्यो भयस्थायी भयानको रसो जायते। गात्रस्याचलनं स्तम्भ । कम्पनं करचरणादिनां प्रवेपनम्। एभिर्गात्र – मुख – दृष्टिविकार – गलशोष – वैवर्ण्य – मूर्च्छा – दयोडनुभावा संगृह्यन्ते। व्याभिचारिणश्चास्य शङ्का – मोह – दैन्य – आवेग – चपलता – त्रास – अपस्मार – मरण – स्तम्भ – खेद – रोमाञ्च – वेपथु – स्वरभेद – वैवर्ण्यादय इति ॥ (17) 119॥

अथ बीभत्सः –

1. हिन्दीनाट्यदर्पण सूत्र - 173 श्लोक क्रमांक (17) 119

(सूत्र 174) – [1] जुगुप्सनीयरुपादि – परश्लाधासमुद्भव ।
बीभत्सोऽभिनयश्चास्य निष्ढेवोद्वेग – निन्दनै ॥ (18) 120 ॥

जुगप्सोनीया मालिन्य – कुथितत्व – दुर्गन्धित्व – कर्कशत्वादिभिर मनोज्ञा । रुषादयो रुप – रस – गन्ध – स्पर्श – शब्दलक्षणा विषया । परश्य विपक्षस्य श्लाधा स्तुतिः । एभ्यो दृष्टश्रुतेभ्यो विभावेभ्यो जुगुप्सास्थायी बीभत्सो रस समुद्भवति । परश्लाधायां हि विशेषतो दोषदर्शन जुगुप्सते । निष्ठव कफनिरसतम् । उद्वेगो गात्रधूननम् । निन्दनं दोषोद्धनधनम् । एभिर्गात्रसङ्कोचनं – मुखविकूणन – नासाकर्णप्रच्छ्रादन – हृल्लेखादिरनुभाव सूच्यते । व्यभिचारिणश्चास्य व्याधि – मोह – आवेग – मरणादय· इति ॥ (18) 120 ॥

अथा द्भूत· –

(सूत्र 175) – [2]दिव्येन्प्रजाल – रम्यार्थ – दर्शनाभीष्टसिद्धित ।
अद्भूत·, सोऽभिनेतव्य· श्लाधा – रोमाञ्च – हर्षत ॥ (19) 121॥

दिव्या शक्रादय । इन्द्रजालं मंत्र – दिव्य – हस्तयुक्त्यादिना असंभवद्वस्तुप्रदर्शनम् । रम्य· सातिशयत्वेन हृद्योऽर्थ शिल्पकर्म – रुप – वाक्य – गन्द् – रस – स्पर्श – नृत्त – गीतादिकः, तस्य दर्शनं साक्षात्कार । अनेन स्वयं कीर्तनं श्रवणं च गृह्यते । अभीष्टमत्यन्तमीप्सितम् । तस्य सिद्धि प्राप्तिर्निष्पत्तिर्वा । एवमादिभ्यो विभावेभ्यो विस्मयस्थायी अदभुतो रसो भवति । हर्षेण स्वानुभावा सूच्यन्ते । एभिर्नयनविस्तार – गात्रोल्लु – कसन – अनिमिषप्रक्षण – चेलोंऽगुलिभ्रमण गद्गद् – वचन – वेपथु – स्वेदा – देरनुभावस्य ग्रह· । व्यभिचारिणश्च आवेग – जडता – सम्भ्रम – स्तम्भ – अश्रु – गद्गद् – रोमाञ्चादय इति ॥ (19) 121 ॥

अथ शान्त·–

(सूत्र 176) –[3] संसारभय – वैराग्य – तत्त्व – शास्त्र – विमर्शनै· ।
शान्तो, ऽभिनयनं तस्य क्षमा – ध्यानोपकारत· ॥ (20) 122 ॥

---

1 हिन्दीनाट्यदर्पण सूत्र - 174 श्लोक क्रमाक (18) 120
2 हिन्दीनाट्यदर्पण सूत्र - 175 श्लोक क्रमाक (19) 121
2. हिन्दीनाट्यदर्पण सूत्र - 176 श्लोक क्रमांक (20) 122

देव – मनुष्य – नारक – तिर्यग्रूपेण बुहुधा परिभ्रमणं संसार., तस्माद् भयम्। वैराग्यं विषयवैमुख्यम्। तत्वस्य जीवाजीवपुण्य – पापादिरुपस्य, शास्त्रस्य मोक्षहेतुप्रतिपादकस्य विमर्शनं पुन. पुनश्चेतसि न्यसनम्। एवमादिभिर्विभावैः, काम – क्रोध – लोभ – मान – मायाद्यनुपरक्त – परोन्मुखताविवजिताक्लिष्ट चेतोरुपशमस्थायी शान्तो रसो भवति। तर्जन – वध – बन्धादिसहनं क्षमा। ध्यानं जीवाजीवादितत्त्वभावनम्। अनेन स्वानुभावा निश्चलदृष्टितादय· सूचिता । उपकरेण मैत्री – प्रमोद – कारुण्य – माध्यस्थ्यादयोऽनुभावा गृह्यन्ते। व्यभिचारिणश्चास्य निर्वेद – मति – स्मृति – धृत्यादय । अयं च कैश्चिन्नोक्त , तेषां सकलक्लेशविमोक्षलत्रणमोक्षपुरुषर्थपराड मुखत्वमेव द्रषणमिति॥ (20) 122 ॥

अथ काव्यषु रसनिबन्धनेऽवहितैर्भाव्यिमिति उपदिशति।

(सूत्र 177) –[1] अर्थ – शब्दवपु काव्यं रसै प्रणैर्विसर्पति।
अञ्जसा तेन सौहार्द रसेषु कविमानिनाम्॥ (21) 123 ॥

शब्दार्थौ अभिनयानभिनेयभेदस्य काव्यस्य वपु शरीरम्। रसा पुन प्रणा । तैर्विभावोपनिबन्धनकरणोपनीतै सहृदयहृदयेषु काव्यं विसर्पति। तेन हेतुना कविमम्मन्यानां अञ्जसा मुख्यतो रसषु सौहार्द प्रीति । रसाविर्भाविना प्रयत्नेनैवोपनीतस्य, अलंकारस्यापि निबन्ध । स चेतश्चमत्कारोत्येव इति आजसा इत्युक्तम्। यथा —

" कपोले पत्राली करतालनिरोधेन मृदिता,
निपीतो नि श्वासैरममृतहृद्योऽधररस ।
मुहु· कण्ठे लग्नस्तरलयति वाष्पः स्तनतटं,
प्रियो मन्युर्जातस्तव निरनुरोधे न तु वयम्॥ "

यथा राधवाभ्युदये —

" तल्लावण्यमनन्यवृत्तिवचसां तत् कौशलं पेशलं,
तत् सौभाग्यम्भाग्यमर्त्यविमुखं तद् यौवानं पावनम्।

1. हिन्दीनाट्यदर्पण सूत्र - 177 श्लोक क्रमाक (21) 123

एकेन प्रियसङ्गमेन मनसो विश्रामधाम्ना विना,
व्यर्थं सा हृदि सर्वमेव मनुते व्यालोलनेत्रोत्यल।। ”

यथा वास्मदुपज्ञे मल्लिकामकरन्दे प्रकरणे मकरन्दः —

“ आस्यं हास्यकरं शशाङ्कयशसां बिम्बाधर सोदर·,
पीपुषस्य, वचांसि मन्मथमहाजस्य तेजांसि च।
दृष्टिर्विष्टपंचन्द्रिका स्तनतटी लक्ष्मीनटीनाट्यभूः,
औचित्याचरणं विलासकरणं तस्या प्रशस्यावधे ।। ”

यथा वास्मदुपज्ञायां वनमालायां नाटिकायाम् —
राजा — पदमयन्तीं प्रतिब —

“ दृष्टि· कथं जारठपाटलपाटलेयं कम्प किमेष पदमोष्ठदले बबन्ध।
नारङ्गरङ्गहरणप्रवण प्रियेडस्य वकत्रस्य कंकुममृतेरुणिमा कुतोडयम् ।। ”
एषु रसप्रयत्नेनैव शब्दार्थालंकारलाभ ।। (21) 123 ।।

अमुभेवार्थ द्रढयात —

(सूत्र 178) – [1] न तथार्थशब्दोत्प्रेक्षा श्लाध्या काव्ये यथा रस ।
विपाकक्रमस्थाम्रं उद्वेजयति नीरसंम् ।। (22) 124 ।।

न हि नवनवार्थव्युत्पन्नशब्द ग्रथनमेव काव्यं, तर्क – व्याकरणयोरपि तथाभावप्रसंगात्। किन्तु विचित्ररसपवित्रशब्दर्थनिवेश· । विपाककमनीयमपि सहकारफलं विरसमुद्धगमावहति। अत शाब्दार्थमात्र शरणा । शुष्क काव्यो यमकश्लेषादीनामेव निबन्धमर्हन्ति। न तु रसैकशरणस्य नाटयस्योति ।। 124 ।।

1. हिन्दीनाट्यदर्पण सूत्र - 178 श्लोक क्रमाक (22) 124

अथ विरुध्द्वरसानां विरोधे व्यवस्थामाह —

(सूत्र 179) –[1] एकत्र स्वैरिणोस्तुल्यशक्त्योर्योगे विरुध्द्वनता।

एकस्मिन्नाश्रये नायकादौ तस्मिन्नेव प्रक्रमे परस्परविरुद्धयो रसायोर्विरुद्धता, न तु भिन्ने। यथाडर्जुनचरिते —

समुत्थिते धनुर्ध्वनौ भयावहे किरीटिनः।
महानुपप्लवोडभवत् पुरे पुरन्दरद्विषाम्॥
अत्र नाटकस्य वीर , प्रतिपक्षाणां तु भयानकः।

यथा वा —

" दन्तक्षतानि करजैश्च विपाटितानि,
प्रोदभिन्नसान्द्रयुलके भवत शरीरे।
दतानि रक्तमनसा मृगराजवध्वा
जातस्पृहैर्मुनिभिरप्यवलोकिनानि॥ "

अत्र तस्मिन्नेव प्रकमे मुनि – कामुकयोर्भिन्नयोर्न श्रृङ्गार – शान्तौ विरुद्धाविति।

तथा स्वैरिणो स्वतन्त्रयो सतोर्विरुद्धयो रसयोविरुद्धता, न तु परतन्त्रस्वन्त्यो , मुख्यस्यायत्तयोर्वा

यथा –

" कुरबक। कुचाधातक्रडासुखेन वियुन्यसे,
बकुलविटपिन्! स्मर्तव्यं ते मुखासवसेचनम्।

1. हिन्दीनाट्यदर्पण सूत्र - 179

चरणधटनाशुन्यो यास्यस्यशोक ! सशोकतां,
इति निजपुरत्यागे यस्य दिषां जगदु· स्त्रिय· ।। ”

अत्रोद्दिपनविभावै कुरबकादिभिरुद्दीप्यमान· श्रृङ्गारो विशेषत करुणं स्वतन्त्रमङ्गिनं द्विषत्स्त्रीणां पोषयति।

यथा वा —

अयं स रशनोत्कषी पीनस्तविमर्दन· ।
नाभ्युरुजधनस्पर्शी नीवीविस्त्रंसनः कर· ।।

अत्र भूरिश्रवस· समरभुवि पतितबाहुदर्शनेन तत्प्रियाणां श्रृङ्गार· स्मर्यमाण करुणं पोषयति।

मुख्यस्यायत्तौ यथा —

“ क्षिप्तो हस्तावलग्न· प्रसभमभिहतोडप्याददानोंडशुकांतं,
गृह्णन केशेष्वपास्तश्चरणनिपतितो नेक्षित सम्भ्रमेण·।
आलिङ्गन् योडवधूतस्त्रिपुरयुवतिभि साश्रुनेत्रोत्पलाभि ,
कामीवा र्द्रापराध स दहतु दुरितं शान्भवो व शराग्नि· ।। ”

अत्र त्रिपुररिपुप्रभावातिशस्य करुण – श्रृङ्गारावङ्गभूतौ । परस्परविरोधेडपि चान्यमुखप्रेक्षितपारतन्त्र्य –

दु·खाभिधातेन स्वात्मपुष्टिमलभमानयो – नृपसमीपस्थित् – आततायिद्वयवत् कुत – श्रृंगायोर्धात्य – धातकभाव इति ?

तथा एकाश्रययोरपि तुल्यबलयोर्विरोधो, न तु हीनाधिकबलयोः। यथा पुरुरवा· प्राह —

" क्याकार्य शशलक्ष्मण क्व च कुलं भूयोडपि दृश्येत सा,
दोषाणां प्रशमाय न श्रृतमहो कोपेडपि कान्तं मुखम्।
किं वक्ष्यत्यपलल्मषाः कृतधियः स्वप्नेडपि सा दुर्लभा,
चेतः ! स्वास्थ्यमुपैहि क खलु युवा धन्योडधरं धास्यति ॥ "

अत्र श्रृङ्गार – शांतयोर्न परस्परमङ्गाङ्गिभावो अपोष्य – पोषकत्वात्। तृतीयस्याभावात अङ्गभावोडपि नास्ति, किन्तु स्वतन्त्रौ। तथापि न विरोध·, शांतस्यागन्तुकत्वेन अल्यबलत्वात्। अत् एवात्र पर्यन्ते श्रृङ्गारे विश्रान्ति·। एवमन्यत्राप्युदाहार्यम्।

तथा एकाश्रययो· स्वैरिणो स्तुल्यशकत्यो र्विरुद्वयोर्योगे नैरन्तर्ये विरोधो न त्वविरुद्धेन रसान्तरेण व्यवधाने। यथा नागानन्दे —

"रागस्यास्पदमित्यवैमि न हि मे ध्वंसीति न प्रत्यय: ।" इत्यादिनोपक्षेपात् प्रभृति शांतो रसस्तस्य विरुध्द्धो मलयवतीविषय: श्रृङ्गार: —

'अहो गीतमहो वादित्रम्' अत्यादिना अद्भुतमन्तरे कृत्वा निबद्ध:। एवमन्येष्वप्युदाहार्यमिति।

विभाव - व्याभिचारिणां तु यसानुरोधेन विरोध: परिहारश्च द्रष्टव्या अथ रसदोषानाह –

(सूत्र 180) –[1] दोषोडनौचित्यमङ्गौयं अपोषोडत्युक्तिरङ्गिभित्॥ (23)125॥

(अ) सृहृदयानां विचिकित्साहेतु कर्मानौचित्यं तच्चोनेकधा।

(क 1) तत्र क्वचित् प्रतिकूलविभाव - मात्रनिबन्धो यथा –

" त्यजत मानमल बत विग्रहैर्न पुनरेति गतं चतुरं वध।
परभृताभिरितीव निवेदिते स्मरमते स्म वधूजन॥"

1 हिन्दीनाट्यदर्पण सूत्र - 180 श्लोक क्रमाक (23) 125

अत्र श्रृङ्गारप्रतिकूलस्य शांरस्यानित्याताप्रकाशरुपो विभावो विरुद्धः।

(क 2) क्वचिदकाण्डे प्रथमन्। यथा वेणीसंहारे धीरोद्धतप्रकृतेरपि दुर्योधनस्य भीष्म - प्रमुख महावीर लक्षक्षयकारिणि प्रवृत्ते समरसंरम्भे भानुमती प्रति श्रृङ्गारवर्णनम्।

(क 3 )क्वचिदकाण्डे विच्छेदो यथा वीररचिते राधव - भार्गवयो - र्धाराधिरुढे वीररसे 'कङ्कणमोचनाय गच्छामि' इति राधवस्योक्तिः।

(क 4 )क्वचिदुत्तमाधम - मध्यमानां प्रकृतुनामन्यथा वर्णनम्। यथा –

उत्तमानां हास्य - बीभत्स - करुण -भयानक - अद्‌भुतप्रकार्षः।

(क 5 )मध्यमाऽधमानां तु अग्राम्यः श्रृंगारः, वीर - रौद्र - शांत - प्रकार्षश्च।

(क 6 )उत्तमीवपि विव्येषु सम्भोगश्रृंगारवर्णनं पित्रोः सम्भोगः - वर्णनसमं यथा कुमारसम्भवे उमा - महश्वरयोः।

(क 7 )अदिव्योषूत्तमेष्वपि सद्यः फलदक्रोध - स्वः - पातालगमन - समुद्रलेधनाद्युत्साहवर्णनम्।

(क 8 )धीरोदात - धीरोध्दृत - धीरललित - धीर शांतेषुत्तमेषु वीर - रौद्र - श्रृंगार - शांतानामवर्णनं विपरीतवर्णनं वा। मध्यमाधमेषु त्वेषु वीरदिरसप्रकार्ष वर्णनम्।

(क 9) क्वचिद् वर्ण - समासान्यथाप्रथनम्। तत्र दीप्तेषु रसेषु संयुन्तैर्मूर्धन्यैश्च वर्णौः समासदैर्ध्येण च प्रायः प्रसन्नो मसृणश्च बन्धः। अदीप्तेषु तु श्रृंगार - हास्य - करुण - शान्तेषु मुर्धस्थवर्गान्यमैर्हृस्वैश्च वर्णौः असमासेन मध्यमसमासेन च प्रायः प्रसन्नो बन्धः। सर्वेषु च प्रसिध्दैरक्लिष्टैरग्राम्यैः पुष्टःर्थैः पदैर्न्यासः।

(क 10) क्वचिदुत्तमस्य उत्तमनायिकानां व्यलीकसम्भावना।

(क 11) क्वचिन्नायिकापादप्रहारादिना नायकस्य कोपः।

(क 12) क्वचिद् वयो - वेष - देश - काला - अवस्था - व्यवहारादीनामन्यथा वर्णनम्।

(क 13) एवमन्यदपि यमम - श्लेष - चित्रायिकं ऋतु - समुदृादि - चन्द्रार्को-दयास्तादिप्रकर्षवर्णनं च रसानङ्गमनौचित्यं द्रष्टव्यमिति।

(ख) अथाङ्गौग्रयम्। अंगस्य मुख्यरसपोषकतया अवयवभूतस्य औग्रयं विस्तारैण्त्कटत्वं दोषः। यथा कृत्यारावणे जटायुबधलक्ष्मणशक्तिभेद - सीताविपत्तिश्रवणेषु रामस्य मुहुर्मुहुः करुणाधिक्यम्। अंगभूतो हि रसो न धाराधिरोहमर्हति, अन्यथाऽङ्गिनं वीररसं तिरोदधीत।

केचिदत्र हयग्रीववधे हयग्रीववर्णणमुदाहरन्ति। स पुनर्वृत्तदोषो वृत्तनायकस्याल्यवर्णनात्। तत्र हि वीरो रसः स विशेषतो बध्यस्य शौर्य - विभूत्यतिशयवर्णनेन भूष्यत इति।

(ग) 'अपोषः' इति धारानधिरोहणं अपोषो दोषः। यथा –

"बीभत्सा विषया, जुगुप्सिततमः कायो, वयो गत्वरं,
प्रायो बन्धुभिरध्वनीव पथिकैर्योगो वियोगावहः।
हातव्योऽयमसम्भवाय विरसः संसार इत्यादिकं,
सर्वस्यापि हि वाचि, चेतसि पुनः कस्यापि पुण्यात्मनः।।"

अत्र कविना 'वाचि' इत्युपनिबध्नता विषयबीभत्सदीनां शान्तजननं प्रति मन्दत्वमुक्तम्। अन्यथा सर्वस्य चेतस्यापि स्यात्। आपोषश्चांगिनो, अंगागिभाववर्जितस्य वा मुक्तकोपात्तस्य।

अंगभूतस्यापोषः पुनरदोष एवेति।

(ध) 'अत्युक्तिः' इति धाराधिरुढस्यापि रसस्य नैरन्तर्येण पुनः पुनः उदीप्तिर्दोषो यथा कुमारसम्भवे रतिप्रलापेषु। लब्धपरिपोषो हि रसः पुनः पुनः परामृश्यमानो मालती - माल्यमिवम्लयति। अत एव प्रकार्षप्राप्तरसविशिष्टानां कवीनामल्पीयानेव वाग्विलास इति।

(ङ) 'अंगभित्' इति बहुरसे प्रबन्धे अवयवभूतरसापेक्षया अंगिनोऽवयविभूतस्य रसस्य
'भिद्' अनुसन्धानं दोषः।

अनुसन्धिर्हि सर्वस्वं रसपोषस्य। स्मृत्यभावे पुनरपोष एव। यथा रत्नावल्यां चतुर्थेऽङ्के बाभ्रव्यागमनात् सारिकाविस्मृतिरिति।

अंगौग्यादयश्च दोषाः परमार्थतो अनौचित्यान्तः पातिनोऽपि सहृदयानामनौचित्यव्युत्पादनार्थ-मुदार्थमुदाहरणत्वेनोपाताः।

केचितु व्यभिचारि - रस - स्थायिनां स्वशब्दवाच्यत्वं रसदोषमाहुः, तदयुक्तम्। व्यभिचार्यादीनां स्ववाचकपदप्रयोगेऽपि विभावपुष्टौ –

"दूरादुत्सुकमागते विवलितं सम्भाषिणि स्फारितं,
संश्लिष्यत्यरुणं गृहीतवसने किञ्चाञ्चितभ्रूलतम्।
मानिन्याश्चरणानतिव्यतिकरे वाष्पाम्बुपूर्णेक्षणं,
चक्षुर्जातमहो प्रपञ्चचतुरं जातागसि प्रेयसि॥"

इत्यादौ रसोत्पत्तेर दोष एवायम्। तस्माद्व्युत्पन्नोत्तिग्त्वादवक्रोक्तिरेवेयम्।

एवमुभयरससाधारणविभावपदानां कष्टेन नियतविभावा भिधापित्वाधिगमोऽपि सन्दिग्धत्वालक्षणो एवा यथा —

" परिहरति रतिं मतिं लुनीते स्खलतितशं परिववर्तते चभूय: ।
इति बत विषमा दशा स्वदेहं परिभवति प्रसभं किमत्र कुर्म: ।।"

अत्र मतिपरिहादीनां विभावानां करुणादावपि सम्भवात् श्रृंगार प्रति भावत्वसन्देह इति ।। (23)125 ।।

अथ वृत्तिलक्षणो रसानन्तरमुधिष्टानां भावानामवसरस्तत्रापि रसानुरोधेन प्रथमं स्थायिन उच्यन्ते ।

(सूत्र 181) रति - र्हासश्च - शोकश्च क्रोधोत्साहौ भयं तथा ।
जुगुप्सा - विस्मय - शमा रसानां स्थायिन: क्रमात् ।। (24) 126 ।।

1. हिन्दीनाट्यदर्पण सूत्र - 181 श्लोक क्रमाक (24) 126